सुग्रीवेणाभ्यनुज्ञाता लङ्कां जग्मु: पताकिनीम्॥१३॥

ते सर्व महातेजस्वी कामरूपी प्रमुदित।
त्या सर्व वानरवीरांनी प्रवेश करता तिथे ॥१२॥
पुष्पे सुगन्धित मंद वायु वाहू लागला।
आज्ञेने सुग्रीवाच्या काही यूथपति।

अलंकृत ध्वजापताकांनी लंकेत प्रवेशती॥१३॥

वित्रासयन्तो विहगान् ग्लापयन्ते मृगद्विपान्।
कल्पयन्तश्च तां लङ्कां नादै: स्वैर्नदतां वरा:॥१४॥

गर्जत वानरवीर सिंहनादे आपुल्या।
घाबरवति पक्षांना तैसे मृगहत्तिना।
कम्पित करत लंका जाती पुढे पुढे॥१४॥

कुर्वन्तस्ते महावेगा महीं चरणपीडिताम्।
रजश्च सहसैवोर्ध्वं जगाम चरणोत्थितम्॥१५॥

पृथ्वीस तुडविता ते महावेग पायतळी।
त्यांच्या पायांनी जी धूळ् उठे उडतसे नभी॥१५॥
ऋक्षा: सिंहाश्च महिषा वारणाश्च मृगा: खगा:।
तेन् शब्देन वित्रस्ता जग्मुर्रता दिशो दश॥१६॥
मृग पक्षी गज सिंह ऋक्ष भयभीत होउनी।
वानरांच्या सिंहनादे पळती दशदिशांस ते॥१६॥
शिखरं तु त्रिकूटस्य प्रांशु चैकं दिविस्पृशम्।
समन्तात् पुष्पसंछन्नं महारजतसंनिभम्॥१७॥

शिखर एक त्रिकूटाचे अत्युच्च स्वर्गस्पर्शी।
त्यावरील पीतपुष्पे भासे सोन्याचेच जणु॥१७॥
शतयोजनविस्तीर्णं विमलं चारुदर्शनम्।
श्लक्ष्णं श्रीमन्महच्चैव दुष्प्रापं शकुनैरपि॥१८॥
शतयोजन विस्तार रम्य विमलदर्शन।
पोचणे कळसावर पक्षांना दुर्लभ असे ॥१८॥
मनसापि दुरारोहं किं पुन: कर्मणाजनै:।
निविष्टा तस्य शिखरे लङ्का रावणपालिता॥१९॥

कल्पनेतहि न शक्य प्रत्यक्ष करणे दूरच
इतुक्या उंच शिखरी रावणलंका स्थापित॥१९॥
दशयोजनविस्तीर्णा विंशयोजनमायता।
सा पुरी गोपुरैरुच्चैः पाण्डुराम्बुदसंनिभैः।
काञ्चनेन च शालेन राजतेन च शोभते॥२०॥
दश योजन रुंदीत वीस योजन दीर्घ जी।
शुभ्र मेघांपरी उच्च गोपुरे असती त्यावरी।
सुवर्णरौप्य शोभित प्राकारांनी सुशोभित॥२०॥

प्रासादैश्च विमानैश्च लङ्का परमभूषिता।
घनैरिवातपापाये मध्यमं वैष्णवं पदम्॥२१॥
ग्रीष्मान्ती वर्षाऋतूचे मेघ शोभति नभी जसे।
तश्या प्रासाद विमानांनी सुशोभित लंकापुरी॥२१॥टिप:सात मजली प्रासादास विमान म्हणत'
यस्यां स्तम्भसहस्रेण प्रासादः समलंकृतः।
कैलासशिखराकारो दृश्यते खमिवोल्लिखन्॥२२॥
अलंकृत स्तंभसहस्रे चैत्यप्रासाद जो दिसे।
कैलास शिखरासम वेध नभाचा घेई जणु॥२२॥

चैत्यः स राक्षसेन्द्रस्य बभूव पुरभूषणम्।
रक्षसां नित्यं यः समग्रेण रक्ष्यते॥२३॥

चैत्य तो राक्षसेन्द्राचा पुरीचे आभूषण।
राक्षस तया रक्षिती साधनांनी सर्व त्या॥२३॥

मनोज्ञां कांचनवर्तीं पर्वतैरुपशोभिताम्।
नानाधातुविचित्रैश्च उद्यानैअरुपशोभिताम्॥२४॥

मनोहर पुरी ऐसी पर्वतालंकृत चित्रित।
विचित्र धातूंनी उद्यानांनी सुशोभित॥२४॥

नानाविहग संपुष्टां नानामृगनिषेविताम्।
नानाकुसुमसम्पन्नं नानाराक्षससेविताम्॥२५॥
मधुरस्वर पक्ष्यांचे मृगादि पशु ऐकती ।
विविध पुष्पसंपन्न पुरीत अनेक राक्षस॥२५॥
तां समृद्धां समुद्रार्थां लक्ष्मीवाल्लक्ष्मणाग्रज:।
रावणस्य पुरीं रामो ददर्श सह वानरै:॥२६॥
रावणाची ती सम्पन्न आणि तशी समृद्ध पुरी।
लक्ष्मणाग्रज् श्रीरामे वानरांसह पाहिली॥२६॥

तां महागृहसम्बाधां दृष्ट्वा लक्ष्मणपूर्वज:।
नगरीं त्रिदिवप्रख्यां विस्मयं प्राप वीर्यवान्॥२७॥
अनेक प्राकारसमृद्ध नगरी स्वर्गतुल्य ती।
श्रीराम लक्ष्मणाग्रज विस्मित होत पराक्रमी॥२७॥
तां रत्नपूर्णां बहुसंविधानां प्रासादमालाभिरलंकृतां च।
पुरीं महायन्त्रकवाटमुख्यां ददर्श रामो महता बलेन ॥२८॥
ती रत्नपूर्ण सुसज्जित प्रासादमालांनी अलंकृत नगरी।
अनेक यन्त्रांनी सुसज्जित द्वारे पाही श्रीराम सेनासहित॥॥२८॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनचत्वारिंश: सर्ग:॥३९॥

युद्धकाण्ड सर्ग ४०

ततो राम: सुवेलाग्रं योजनद्वय मण्डलम्।
उपारोहत् सौग्रीवो हरियूथै: समन्वित:॥१॥
श्रीराम सुग्रीवासह यूथपति ज्याच्या सवे
चढे सुवेलाग्रावरी जे दोन योजन विस्तृत॥१॥
स्थित्वा मुहूर्तं तत्रैव दिशो दश विलोकयन्।
त्रिकूटशिखरे रम्ये निर्मितां विश्वकर्मणा॥२॥

ददर्श लङ्कां स्न्यस्तां रम्यकाननशोभिताम्।
तेथे घडिभर थांबून पाहता सर्व दिशांस।
त्रिकूटशिखरी रम्य विश्वकर्म्याने निर्मित।२॥
पाही लंका नगरी मनोहर कानने सुशोभित ।
तस्य गोपुरशृङ्गस्थं राक्षसेन्द्रं दुरासदम्॥३॥
श्वेतचामरपर्यन्तं विजयच्छत्रशोभितम्।
रक्तचन्दनसंलिप्तं रत्माभरणभूषितम्॥४॥
दिसे राक्षसराज गोपुराच्या छतावर॥३॥

दोन्ही बाजूस ज्याच्या श्वेतचवऱ्या ढाळती।
शिरी श्वेतचामर विजयच्छत्र शोभती।
रक्तचंदन चर्चित शरीर सर्व त्याचे असे।
रक्तवर्ण आभूषणे अंग त्याचे भूषित॥४॥
नीलजीमूतसंकाशं हेमसंछादिताम्बरम्।
ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसम्॥५॥
मेघासम दिसे कृष्ण वस्त्रे हेमरेखांकित।
आघाते ऐरावताच्य चिह्ने ती वक्षावरी ॥५॥

शशलोहितरागेण संवीतं रक्तवाससा।
संध्यातपेन संछन्नं मेघराशिमिवाम्बरे॥६॥

शशरक्तासम लाल वस्त्राच्छादित त्यामुळे ।
दिसे सान्ध्य उन्हाने आच्छादित मेघासम॥६॥

पश्यतां वानरेन्द्राणां राघवस्यापि पश्यत:।
दर्शनाद् राक्षसेन्द्रस्य सुग्रीव: सहसोत्थित:॥७॥

दिसता मुख्य वानरांसवे रावण श्रीरामापुढे ।
दृष्टि त्यावर पडता सुग्रीव अचानक उभा॥७॥

क्रोधवेगेन संयुक्त: सत्त्वेन च बलेन च।
अचलाग्रादथोत्थाय पुप्लुवे गोपुरस्थले ॥८॥

क्रोधाने आणि सत्त्व बलाने प्रेरित ।
गोपूरछतावरी तो उडी मारी तेथुनी॥८॥

स्थित्वा मुहूर्तं सम्प्रेक्ष्य निर्भयेनान्तरात्मना।
तृणीकृत्य च तद् रक्ष: सोऽब्रवीत् परुषं वच:॥९॥

उभा राहुनि निर्भय चित्ताने पाही रावणा।
तृणवत् लेखुनि त्यास कठोर वाणीने बोलला॥९॥

लोकनाथस्य रामस्य् सखा दासोऽस्मि राक्षसः।
न मया मोक्ष्यसेऽद्य त्वं पार्थिवेन्द्रस्य तेजसा॥१०॥
लोकनाथ रामाचा मी सखा नि दास राक्षसा।
न तुज आज सोडीन तेजामुळे श्रीरामाच्या॥१०॥
इत्युक्त्वा सहसोत्पत्य पुप्लुवे तस्य चोपरि।
आकृष्य मुकुटं चित्रं पातयामास तद्भुवि॥११॥
ऐसे बोलुनि मारूनि उडी तो रावणावरी।
मुकुट त्याचा खेचुनी पाडि त्या धरतीवरी॥११॥

समीक्ष्य तूर्णमायान्तं बभाषे तं निशाचरः।
सुग्रीवस्त्वं परोक्षं मे हीनग्रीवो भविष्यसि॥१२॥
तया तीव्रगति येता पाहता रावण वदे।
सुग्रीवा मजपुढे येता होशील हीनग्रीव तू॥१२॥
इत्युक्त्वोत्थाय तं क्षिप्रं बाहुभ्यामाक्षित् तलेः।
कन्दुवत् स समुत्थाय बाहुभ्यामाक्षिपद्धरिः ॥१३॥
बोलुनि उचलुनी त्या तत्काळ आपटे भूवरी।
सुग्रीवहि चेंडूसम त्या आपटे भूमीवरी॥१३॥

परस्परं स्वेदविदिग्धमात्रौ परस्परं शोणितरक्तदेहौ।
परस्परं श्लिष्टनिरुद्धचेष्टौ परस्परं शाल्मलिकिंशुकाविव॥१४॥

पकडती एकमेका घर्म रक्ते नाहती जे।
दिसती फुललेल्या सेमल पलाश वृक्षापरी

मुष्टिप्रहारैश्च तलप्रहारैररनिघातैश्च कराग्रपातैः।
तौ चक्रतुयुद्धमसयरूपं महाबलौ राक्षसवानरेन्द्रौ॥१५॥

बलवान् उभय दोघे बुक्क्या थप्पड मारती।
एकमेका घनघोर मुष्टियुद्ध करती असे॥१५॥

कृत्वा नियुद्धं भृशमुग्रवेगौ कालं चिरं गोपुरवेदिमध्ये।
उत्क्षिप्य चोरिक्षप्य विनम्य देहौअ पादक्रमाद् गोपुर्वेदिलग्नौ॥१६॥

करती मल्लयुद्ध गोपूर चबुतऱ्यावरी उचलति दाबति पदे एकमेका।
डावपेच असे हस्तपादे करीत करीत चबूतऱ्यावरूनि पोचती कडेस॥१६॥

अन्योन्यमापीड्य विलग्नदेहो तौ पेततु: सालनिखातमध्ये।
उत्पेततुर्भूमितलं स्पृशन्तौ स्थित्वा मुहूर्तं त्वभिनिश्वसन्तौ॥१७॥

एकमेका दाबुनि अलग् होत सुटुनी पडती तटबंदी खंदकामधे।
धापा टाकित धरेवरुनि क्षणात काही उठती राहती उभे पुन्हा ॥१७॥

आलिङ्ग्य चालिङ्ग्य च बाहुयोक्त्रै: संयोजयामासतुराहवे तौ।
संरम्भशिक्षाबलसम्प्रयुक्तौ सुचेरतु: सम्प्रति युद्धमार्ग:॥१८॥

पुन:पुन्हा पकडुनि एकमेका बाहुपाशी कुस्तीतले योजुनि डावपेच।
दोघे शरीरबले सम्पन्न एकमेका पकडुनि भ्रमण करू लागती॥१८॥

शार्दूलसिंहाविव जातदंष्ट्रो गजेन्द्रपोताविव सम्प्रयुक्तौ।
संहत्य संवेद्य च तौ कराभ्यां तौ पेततुर्वे युगपद् धरायाम्॥१९॥

नुक्तेच दन्त ज्या आले ऐश्या व्याघ्रसिंह बालकापरी लढता परस्पर।
हस्तपादे एकमेकाचे बल अजमाविता एकमेकासवे पडती पृथ्वीवरी॥१९॥

उद्यम्य चान्योन्यमधिक्षिपन्तौ संचक्रमाते बहु युद्धमार्गे।
व्यायामशिक्षाबलसम्प्रयुक्तौ क्लमं न तौ जग्मतुराशु वीरौ॥२०॥

कुस्तीपटू कसलेले युद्धशिक्षित बलसंपन्न उभय जिंकण्यासाठी।
कौशल्य लढण्याचे दाखवीत एकमेका वीर ते श्रान्त न होती॥२०॥

बाहूत्तमौरणवारणाभैनिवारयन्तौ परवारणाभौ।
चिरेण कालेन भृशं प्रयुद्धौ संचेरतुर्मण्डलमार्गमाशु॥२१॥

हत्तींपरी मत्त दोघे ज्यांचे बलिष्ट बाहुदण्ड ।
शुण्डदण्डापरी स्थूल करती युद्ध आवेशे ।

आणि बदलती शीघ्र पवित्रे एकमेकावरी॥२१॥

तौ परस्परमासाद्य यत्तावन्योन्यसूदने।
मार्जाराविव भक्षार्थेऽवतस्थाते मुहुर्मुहुः॥२२॥

मारण्यास एकमेका करती प्रयत्न दोघे।
गुरगुरत जशी दोन मांजरे भक्ष्यास्तव ॥२२॥

मण्डलानि विचित्राणि स्थानानि विविधानि च।
गोमूत्रकाणि चित्राणि गतप्रत्यागतानि च॥२३॥

विचित्र मण्डले घेत गोमूत्र रेषा जशी।

पुढे मागे गति घेत कुटिल विचित्र अशी॥२३॥

मण्डल हे मल्लयुद्धातील प्रकार असतात

तिरथीनगतान्येव तथा वक्रहतानि च।
परिमोक्षं प्रहाराणां वर्जनं परिधावनम्॥२४॥
अभिद्रवणमाप्लावमवस्थानं सविग्रहम्।
परावृत्तमपावृत्तम्अपद्रुतमवप्लुतम्॥२५॥
उपन्यस्तमपन्यस्तं युद्धमार्गविशारदौ।
तौ विएरतुन्योन्यस्तं युद्धामार्गविशारदौ।
तौ विचेरतुरन्योन्यं वानरेन्द्रश्च रावण:॥२६॥

कधी तिर्यक् चाल कधी वाकडे चालुनी।
दोन्ही बाजूस फिरती कधी चुकवती वार।
कधी एक उभा राही फिरे भोवती दुसरा।
कधी एकमेकासमोर आक्रमण करती वेगे॥
कधी पसरती बाहु पकडण्या बाहु अन्याचे।
कधी सरती मागे सुटण्या पकडीतुनी।
मल्लयुद्ध प्रविण दोघे आघात करण्यास्तव।
मण्डलाकार फिरती उभय एकमेकाभोवती॥२४-२६॥

एतस्मिन्नंतरे रक्षो मायाबलमथात्मन:।
आर्ब्धुमुपसम्पेदे ज्ञात्वा तं वानराधिप:॥२७॥
उत्पपात तदाऽऽकाशं जितकाशी जितक्लम:।
रावण: स्थित एवात्र हरिराजेन वञ्चित::॥२८॥
मायाशक्ती योजण्याचा विचार रावण करी।
ताडुनिया हे सुग्रीव उडे आकाशी जो असे।
विजयोल्लासे शोभित श्रमपरिहार होउनी॥
चकवुनी राक्षसराजा पाही हे जो उभ्या उभ्या॥२७-२८॥

अथ हरिवरनाथ: प्राप्तसंग्रामकीर्तिनिशिचरपतिमाजौ योजयित्वा श्रमेण।
गगनमतिविशालं लयित्वार्कसूनु हरिगणबलमध्ये रामपार्वं जगाम॥२९॥

संग्रामे कीर्ति ज्या प्राप्त वानरेन्द्र सुग्रीव रावणा युद्धात थकवुनी।
लङ्घुनी विशाल आकाशमार्ग परते वानरसेनेत श्रीरामचन्द्राजवळी॥२९॥

इति स सवितृसूनुस्तत्र तत् कर्म कृत्वा पवनगतिरनीकं प्राविशन्सम्प्रहृष्ट:।
रघुवरनृपसूनौर्वर्धयन् युद्धहर्ष् तरुमृगगणमुख्यै: पूज्यमानो हरीम्द्त:॥३०॥

करुनि कृत्य अद्भुत असे शीघ्रगामी सूर्यपुत्र वाढवाया दशरथपुत्र श्रीरामाचा।
उत्साह युद्धाचा तेव्हां कपिप्रमुख अभिनन्दति त्या करता प्रवेश तो॥३०॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चत्वारिंश: सर्ग:॥४०॥

युद्धकाण्ड सर्ग ४१

अथ तस्मिन् निमित्तानि दृष्ट्वा लक्ष्मणपूर्वज:।
सुग्रीवं सम्पैष्वज्य रामो वचनमब्रवीत्॥१॥
पाहुनिया युद्धचिह्न सुग्रीवाच्या तनावरी।
लाऊनि हृदयासी त्या श्रीराम वच बोलती॥१॥
असमन्त्र्य मया सार्धं तदिदं साहसं कृतम्।
एवं साहसयुक्तानि न् कुर्वन्ति जनेश्वरा:॥२॥

सुग्रीवा सल्ल्यावाचुनि मम करसी साहस ।
असे दु:साहस नच राजेन्द्राने करायचे॥२॥
संशये स्थाप्य मां चेदं बलं चेमं बिभीषणम्।
कष्टं कृतमिदं वीर साहसं साहसप्रिय॥३॥
मजसवे वानरसेना बिभीषणा नच सांगता।
करसी साहस ज्याने कष्ट बहु झाले आम्हा॥३॥
इदानीं मा कृथा वीर एवंविधमरिंदम।
त्वयि किंचित्समापन्ने किं कार्यं सीतया मम॥४॥

भरतेन महाबाहो लक्ष्मणेन यवीयसा।
शत्रुघ्नेन च शत्रुघ्न स्वशरीरेण वा पुनः॥५॥
दुःसाहस महाबाहो न करी पुन्हा असे।
तुला जर काही झाले तर मजसवे सीता ॥४॥
भरत लक्ष्मणासह शत्रुघ्न यांसह मी स्वतः।
घेउनि करणार काय शरीरा या आपुल्या॥५॥
त्वयि चानागते पूर्वमिति मे निश्चिता मतिः।
जानतश्चापि ते वीर्यं महेन्द्रवरुणोपम॥६॥

हत्वाहं रावणं युद्धे सपुत्रबलवाहनम्।
अभिषिच्य च लङ्कायां बिभीषणमथापि च॥७॥
भरते राज्यमारोप्य त्यक्ष्ये देहं महाबल।

तू न आल्यामुळे केले होते मी निश्चित।
जाणतो जरि पराक्रमी तू महेन्द्र वरुणासम॥६॥
मारुनी पुत्रसेनेसह युद्ध करुनि रावणा।
अभिषेक बिभीषणा करुनी लंका राज्यावरी॥७॥
भरता अयोध्या राज्य देउनी देह त्यागणे।

तमेवं वादिनं रामं सुग्रीव: प्रत्यभाषत॥८॥
तव भार्यापहर्तारं दृष्ट्वा राघव रावणम्।
मर्षयामि कथं वीर जानन् विक्रममात्मन:॥९॥
ऐसे बोलता श्रीराम उत्तरे त्यास सुग्रिव।
जाणता स्वपराक्रम मी पाहुनि रावणास जो।
करी आपल्या भार्येचे अपहरण त्याजला।
पाहुनी क्षमा कैसी करणे शक्य असे मला॥८-९॥
इत्येव वादिनं वीरमभिनन्द्य च राघव:।
लक्ष्मणं लक्ष्मिसंपन्नमिदं वचनमब्रवीत्॥१०॥

ऐकूनि वचन त्याचे करूनी अभिनन्दन ।
लक्ष्मिसंपन्न लक्ष्मणा श्रीराम वदती असे॥१०॥
परिगृह्योदकं शीतं वनानि फलवन्ति च।
बलौघं संविभज्येमं व्यूह्य तिष्ठाम् लक्ष्मण॥११॥
आश्रये शीतजलाशय तैसे फलसंपन्न वन ।
विभागून सेनेस रचसी व्यूह युद्धास्तव॥११॥
लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम्।
निबर्हणं प्रवीराणामृक्षवानररक्षसाम्॥१२॥

लोकसंहार सूचक पाहतो मी भयानक।
त्यावरुनी सिद्ध होई रुक्ष वानर राक्षस।
मुख्य वीरांचा युद्धात त्यांच्या संहार होइल॥१२॥
वाता हि परुषं वान्ति कम्पते च वसुन्धरा।
पर्वताग्राणि वेपन्ते नदन्ति धरणीधरा:॥१३॥
येतसे प्रचंड वादळ धरणी कम्प पावते।
हलती पर्वतशिखरे चित्कारती दिग्गज॥१३॥
मेघा: क्रव्यादसंकाशा:परुषा: परुषस्वरा:।
क्रूरा: क्रूरं प्रवर्षन्ते मिश्रं शोणितबिन्दुभि:॥१४॥

क्रूर होउनिया मेघ गर्जती कठोर स्वरे।
वर्षा रक्तबिन्दुयुक्त करती क्रूरपणे ते॥१४॥
रक्तचन्दनसंकाशा संध्या परमदारुणा।
ज्वलच्च निपतत्येत्दादित्यादग्निमण्डलम्॥१५॥
दारुण सन्ध्या लाल रक्तचंदनासम दिसे।
पुञ्ज जळत्या अग्नीचा निघतसे सूर्यातुनी॥१५॥
आदित्यभिवाश्यन्ति जनयन्तो महद्भयम्।
दीना दीनस्वरा घोरा अप्रशस्ता मृगद्विजा:॥१६॥

पशु पक्षी पाहुनि सूर्या दीनस्वरे चित्कारती।
भयंकर त्यामुळे दिसती उत्पन्न करती भय॥१६॥

रजन्यामप्रकाशश्च संतापयति चन्द्रमा:।
कृष्णरक्तांशुपर्यन्तो यथा लोकस्य संक्षये॥१७॥

क्षीणप्रकाश चन्द्रमा न शीतल संताप दे।
कृष्णरक्तकडा त्याच्या संहारकाल सूचक॥१७॥

ह्स्वो रूक्षोऽप्रशस्तश्च परिवेष: सुलोहित:।
आदित्यमण्डले नीलं लक्ष्म लक्ष्मण दृष्यते॥१८॥

रुक्ष अमंगल लाल घेरा तो सूर्यमण्डले।
तसेच त्यासवे कृष्ण चिह्नही दिसे लक्ष्मणा॥१८॥
काका: श्येनास्तथा गृध्रा नीचै: परिपतन्ति च।
शिवाश्चाप्यशुभा वाच: प्रवदन्ति महास्वना:॥२०॥
काक गृध्र ससाणे भूतली येउनि बैसती।
गिधाडे जोरजोराने अमङ्गल ध्वनि काढती॥२०॥
शैले शूलैश्च खड्गैश्च विमिक्तै: कपिराक्षसै:।
भविष्यत्यावृता भूमिर्मांसशोणितकर्दमा॥२१॥

वानरे राक्षसे क्षिप्त शिलाखण्डे खडगशूले।
फाटुनी भूमिवर होई चिखल रक्तमांसाचा ॥२१॥
क्षिप्रमद्य दुराधर्षां पुरीं रावणपालिताम।
अभियाम जनेनैव सर्वतो हरिभिर्वृता:॥२२॥
दुर्जय पुरीवरती रावण जी रक्षीतसे।
आक्रमण करू शीघ्र वानरांसह आपण॥२२॥
इत्येवं तु वदन् वीरो लक्ष्मणं लक्ष्मणाग्रज:।
तस्मादवातरच्छीघ्रं पर्वताग्रान्महाबल:॥२३॥

लक्ष्मणा बोलत ऐसे महाबली श्रीरामचन्द्र।
शिखरावरुनी तत्काल खाली आले उतरुनी॥२३॥
अवतीर्य तु धर्मात्मा तस्माच्छैलात् स राघवः।
परैः परमदुर्धर्षंददर्श बलमात्मनः॥२४॥
पर्वतावरुनी खाली येउनी निरीक्षति राघव।
सेना आपली शत्रूंना अति दुर्जय जी असे॥२४॥
संना तु ससुग्रीवः कपिराजबलं महत्।
कालज्ञो राघवः काले संयुगायाभ्यचोदयत्॥२५॥

सहाय्ये सुग्रीवाच्या सेना करुनि सुसज्जित।
कालज्ञ राघव युद्धा शुभ समय पाहुनी।
आज्ञापी त्यावेळी कूच करण्यास युद्धास्तव॥२५॥
ततः काले महाबाहुर्बलेन महता वृतः।
प्रस्थितः पुरतो धन्वी लङ्कामभिमुखः पुरीम्॥२६॥
धनुर्धर श्रीरामचन्द्र विशाल सेनेच्या सवे ।
पुढे जाउनी प्रस्थित जाण्या लंकापुरीकडे॥२६॥
तं बिभीषणसुग्रीवौ हनूमाञ्जाम्बवान् नलः।
ऋक्षराजस्तथा नीलो लक्ष्मणश्चान्वयुस्तदा॥२७॥

तेव्हां बिभीषण सुग्रीव ऋक्षराज जाम्बवान्।
नल नील लक्ष्मण हे अनुसरति त्यामागुनी॥२७॥
तत: पश्चात् सुमहती पृतनक्षवनौकसाम्।
प्रच्छाद्य महती भूमिमनुयाति स्म राघवम्॥२८॥
कपिऋक्श यांची आच्छादुनि भू महा।
विशाल सेना निघे कपिऋक्षांची मागुनी ।
आच्छादुनि महाभूमी श्रीरामामागुनी॥२८॥
शैलशृंगाणि शतश: प्रवृद्धांश्च महीरुहान्।
जगृहु कुञ्जरप्रख्या वानरा: परवारणा:॥२९॥

गजासम विशालकाय कपि शैलशिखरे तसे।
वृक्षही मोठे हाती घेती शत्रुला रोखण्या॥२९॥
तौ त्वदीर्पण कालेन भ्रातरौ रामलक्ष्मणौ।
रावणस्य पुरीं लंकामासेदतुररिंदमौ॥३०॥
शत्रुचे दमन करणारे बन्धु श्रीराम लक्ष्मण ।
पोचती अल्प कालात लंकापुरीच्या जवळी ॥३०॥
पताकामालिनी रम्यामुद्यानवनशोभिताम्।
चित्रवप्रां सुदुष्प्रापामुच्चै:प्राकारतोरणाम्॥३१॥

अलंकृत पताकांनी उद्याने वन शोभित।
तटबन्दी चौबाजूंनी प्रवेश दुर्लभ करी॥३१॥
तां सुरैरपि दुर्धर्षां रामवाक्यप्रचोदिता:।
यथानिदेशं सम्पीड्य न्यविशन्त वनौकस:॥३२॥
आक्रमण देवांनाही करण्या जी अवघड।
परि श्रीरामआज्ञेने प्रेरित होउनि वानरे ।
वेढा घालुनि पुरीत प्रवेशण्या आरम्भती॥३२॥
लङ्कायास्तूत्तरद्वारं शैलशृङ्गमिवोन्नतम्।
राम: सहानुजो धन्वी जुगोप च रुरोध च॥३३॥

शैलशृंगापरी उंच लंकेचे उत्तरद्वार ।
रामलक्ष्मण तेथे राहुनी सैन्या रक्षती॥३३॥
लङ्कामुपनिविष्टस्तु रामो दशरथात्मज:।
लक्ष्मणानुचरो वीर: पुरीं रावणपालिताम्॥३४॥
उत्तरद्वारमासाद्य यत्र तिष्ठति रावण:।
नान्यो रामाद्धि तद् द्वारं समर्थ: परिरक्षितुम्॥३५॥
जाउनि लंकेजवळी दशरथात्मज श्रीराम।
सवे लक्ष्मणा घेऊनि पुरीत रावणपालित॥३४॥

येऊनि उत्तरद्वारी स्वत: रावण असे जिथे।
अन्या न कुणा शक्य तेथे सैन्या रक्षिणे॥३५॥

रावणाधिष्ठितं भीमं वरुणेनेव सागरम्।
सायुधै राक्षसैर्भीमैरभिगुप्तं समन्तत:॥३६॥

भयानक त्या द्वारी राक्षसांनी सुरक्षित।
उभा रावण जैसा सागरी वरुण देवता॥३६॥

लघूनां त्रासजननं पातालमिव दानवै:।
विन्यस्तानि च योधानां बहूनि विविधानि च॥३७॥

ददर्शायुधजालानि तथैव कवचानि च।
क्षीणजना भयकारी पाताळासम दानवी।
शस्त्रे नाना प्रकारची कवचही असती तिथे॥३७॥
योद्ध्यांची ठेवलेली पाही भगवान् श्रीराम ।
पूर्वं तु द्वारमासाद्य नीलो हरिचमपतिः॥३८॥
अतिष्ठत् सह मैन्देन द्विविदेन च वीर्यवान्।
पूर्व द्वारी येउनिया नील कपिसेनापति॥३८॥
उभा राही पराक्रमी मैन्द द्विविद यांसवे।

अङ्गदो दक्षिणद्वारं जग्राह सुमहाबल:॥३९॥
ऋषभेण गवाक्षेण गजेन गवयेन च।
दक्षिणद्वारी अङ्गद उभा राही महाबली॥३९॥
ऋषभ गज गवाक्ष गवय यांच्यासवे।
हनूमान् पश्चिमद्वारं ररक्ष बलवान् कपि:॥४०॥
प्रमाथिप्रघसाभ्यां च वीरैरन्यैश्च संगत:।
हनूमान पश्चिमद्वार रक्षितो बलवान् कपि॥४०॥
प्रमाथी प्रघस आदि वानरवीरांच्या सवे।

मध्यमे च स्वयं गुल्मे सुग्रीव: समतिष्ठत॥४१॥
सह सर्वहरिश्रेष्ठै: सुपर्णपवनोपमै:।
उत्तर पश्चिम मध्ये राक्षससेनातळ जिथे।
तेथे गरुड वायु सम श्रेष्ठ वानरवीरांसह॥४१॥
स्वत: सुग्रीव येवोनी आक्रमण करीतसे।
वानराणां तु षट्त्रिंशत्कोट्य: प्रख्यातयूथपा:॥४२॥
निपीड्योपनिविष्टाश्च सुग्रीवो यत्र वानर:।
छत्तीस कोटी विख्यात यूथप सुग्रीवासवे॥४२॥
राक्षसां पीडा देण्यास राहती वानरांसवे।

शासनेन तु रामस्य लक्ष्मण: सबिभीषण:॥४३॥
द्वारे द्वारे हरिणां तु कोटि कोटीर्यवेशयत्।
आज्ञेनुसार रामाच्या बिभीषणा सह लक्ष्मण॥४३॥
प्रत्येक द्वारी नियुक्त करी एक कोटी वानरां।
पश्चिमेन तु रामस्य सुषेण: सहजाम्बवान्॥४४॥
अदूरान्मध्यमे गुल्मे तस्थौ बहुबलानुग:।
राहुनि रामाच्या मागे सुषेण आणि जाम्बवान्॥४४॥
रक्षती मधील सैन्यास बहुत सैन्य घेउनी ।

ते तु वानरशार्दूला: शार्दूला इव दंष्ट्रिण:।
गृहीत्वा द्रुमशैलाग्रान् हृष्टा युद्धाय तस्स्थिरे॥४५॥

वाघासम तीक्ष्ण दातांचे वानरसिंह हर्षोत्साहे।
हाती वृक्ष गिरिशिखरे घेउनी सज्ज युद्धास्तव॥४५॥

सर्वे विकृतलाङ्गला: सर्वे दंष्ट्रानखायुधा:।
सर्वे विकृतचित्राङ्गा: सर्वे च विकृताननाः॥४६॥

आयुधे दंतनखे त्यांची पुच्छां क्रोधे हलविती।
सर्वांगी विचित्र चिह्ने विकट विक्राळ मुखे॥४६॥

दशनागबला: केचित् केचिद् दशगुणोत्तरा:।
केचिन्नागसहस्रस्य बभूवस्तुल्यविक्रमा:॥४७॥

बले दशगजासम काही शतगजासम।
काहीं पराक्रमी असती सहस्र् हत्तींसम॥४७॥

सन्ति चौघबला: केचित् केचिच्छतगुणोत्तरा:।
अप्रमेयबलाश्चान्ये तत्रासन् हरियूथपा:॥४८॥

दशसहस्र हत्तींचे बल काहींचे असे।
शतपट काहींचे तर काहींचे अपरिमित॥४८॥

अद्भुतश्च विचित्रश्च तेषामासीत समागम:।
तत्र वानरसैन्यानां शलभानामिवोद्गम:॥४९॥

समागम त्या सर्वांचा विचित्र आणि अद्भुत।
आवेश त्यां सर्वांचा टोळधाडीसम दिसे॥४९॥

परिपूर्णमिवाकाशं सम्पूर्णेव च मेदिनी।
लङ्कामुपनिविष्टैश्च सम्पतद्भिश्च वानरै:॥५०॥

वानरांनी येणाऱ्या त्या भरुनी जाई नभ।
प्रवेशिता ते लंकेत होइ पृथ्वि आच्छादित॥५०॥

शतं शतसहस्राणां पृतनक्षवनौकसाम्।
लङ्काद्वाराण्युपाजग्मुरन्ये योद्धं समन्ततः॥५१॥
लंकेच्या चार द्वारात् कॊटी वानरसेना उभी।
युद्धास्तव इतरत्र जाती अन्य सैनिक ॥५१॥
आवृतः स गिरिः सर्वैस्तैः समन्तात् प्लवङ्गमैः।
अयुतानां सहस्रं च पुरी तामभ्यवर्तत॥५२॥
घेरला सर्वबाजूंनी त्रिकूट पर्वत वानरे।
देखरेख कोटि अन्य करती नगरामध्ये॥५२॥

वानरैर्बलवद्भिश्च बभूव द्रुमपाणिभि:।
सर्वत: संवृता लङ्का दुष्प्रवेशापि वायुना॥५३॥
वृक्षधारी बलवान् वानरे आवृत्त लंकेत ।
प्रवेश करणे होई वायुलाही दुष्कर॥५३॥
राक्षसा विस्मयं जग्मु: सहसाभिनिपीडीता:।
वानरैर्मेघसंकाशै: शक्रतुल्यपराक्रमै:॥५४॥
कृष्णवर्ण मेघासम इन्द्रासम पराक्रमी।
वानरे पीडित होती विस्मयचकित राक्षस॥५४॥

महाच्छब्दोऽभवत् तत्र बलौघस्याभिवर्ततत।
सागरस्येव भिन्नस्य यथा स्यात् सलिलस्वन:॥५५॥

कोलाहल होत तेथे जणु सेतु तोडुनी।
अमर्याद वाहणाऱ्या सागरजलाचा महान्॥५५॥

तेन शब्देन महता सप्राकारा सतोरणा।
लङ्का प्रचलिता सर्वा सशैलवनकानना॥५६॥

भयंकर नादाने त्या प्राकार द्वारे पर्वत।
हादरुनी लंका जात वने काननासहित॥५६॥

रामलक्ष्मणगुप्ता सा सुग्रीवेण्अ च वाहिनी।
बभूव दुर्धर्षतरा सर्वैरपि सुरासुरै:॥५७॥
श्रीराम लक्ष्मण सुग्रीवे रक्षित कपिसैन्य ते।
विशाल दुर्जय असे देवता असुरांसही॥५७॥
राघव: संनिवेशैवं स्वसैन्यं रक्षसां वधे।
सम्मन्त्र्य मन्त्रिभि: सार्धं निश्चित्य च पुन: पुन:॥५८॥
आनन्तर्यमभिप्रेप्सु: क्रमयोगार्थतत्वचित्।
बिभीषणस्यानुमते राजधर्ममनुस्मरन्॥५९॥

अङ्गदं वालितनयं समाहूयेदमब्रवीत्।
स्थापुनी आपुली सेना ऐसी शत्रुवधास्तव।
श्रीराम मन्त्र्यांसह करी विचार विनिमय॥५८॥
जाणुनी अर्थतत्त्वास साम दामादि राघव।
बिभीषण अनुमतीने राजधर्मा स्मरुनिया॥५९॥
बोलावुन वालिपुत्रा बोले त्याजला असे।
गत्वा सौम्य दशग्रीवं ब्रूहि मद्रचनात् कपे॥६०॥
लवयित्वा पुरीं लंकां भयं त्यक्त्वा गतव्यथः।
भ्रष्टश्रीकं गतैश्वर्य मुमूर्षानष्टचेतनम्॥६१॥

सौम्य जाउनी सांग भय सोडुनि लंकेत॥६०॥
दशग्रीवा माझे वच राज्यलक्ष्मीभ्रष्ट जो।
छिन्नऐश्वर्य आणि मरण्याची इच्छा धरी॥६१॥
ऋषीणां देवतानां च गन्धर्वाप्सरसां तथा।
नागानामथ यक्षाणां राज्ञां च रजनीचर॥६२॥
यच्च पापं कृतं मोहादवलिप्तेन राक्षस।
नूनं ते विगतो दर्प: स्वयंभूवरदानज:
तस्य पापस्य सम्प्राप्ता व्युष्टिरद्य दुरासदा॥६३॥

ऋषि देवता गन्धर्व यक्ष नाग नि अप्सरा।
यांचा तू राक्षसराज अससी अपराधी महा।६२॥
वरदाने ब्रह्म्याच्या अभिमान होतसे तुज।
येतसे समय आता नष्ट होण्याचाच तो।
दु:सह तव पापाचा फल आज उपस्थित॥६३॥
यस्य दण्डधरस्तेऽहं दाराहरणकर्शित:।
दण्डं धारयमाणस्तु लङ्काद्वारे व्यवस्थित:॥६४॥
अपराध्यांना देणारा दण्ड असे मी शासक।

अपहरण केलेस मम भार्येचे कष्टलो।
दण्ड करण्या त्यास्तव उभा दारी मी तुझ्या॥६४॥
पदवी देवतानां च महर्षीणां च राक्षस।
राजर्षीणां च सर्वेषां गमिष्यसि युधि स्थिर:॥६५॥
उभा राहता युद्धास राजर्षि महर्षि देवता ।
पोचशील पदवीस त्यांच्या स्वर्गात जाउनी॥६५॥
बलेन येन वै सीतां मायया राक्षसाधम।
मामतिक्रमयित्वा त्वं हृतवांस्तन्निदर्शय॥६६॥

बळावर ज्या मजला फसवुनी सीतेस तू।
पळविलेस दाखव ते बल आज रणांगणी॥६६॥

अराक्षमिमं लोकं कर्तास्मि निशितै: शरै:।
न चेच्छरणमभ्येषि तामादाय तु मैथिलीम्॥६७॥

मैथिलीसह येशील न शरण जर तू मज।
करीन् तीक्ष्ण बाणे हे राक्षसहीन मी जग॥६७॥

धर्मात्मा राक्षसश्रेष्ठ: सम्प्राप्तोऽयं बिभीषण:।
लङ्केश्वर्यमिदं श्रीमान् ध्रुवं प्राप्नोत्यकण्डकम्॥६८॥

बिभीषण राक्षसश्रेष्ठ असे मजसवे इथे।
निष्कंटक लंकाराज्य त्यालाच प्राप्त होइल॥६८॥
नहि राज्यमधर्मेण भोक्तुं क्षणमपि त्वया।
शक्यं मूर्खसहायेन पापेनाविदितात्मना॥६९॥
न तू जाणसि स्वत:स पापी तू मूर्खसहाय्ये।
न भोगसी अधर्माने क्षणभरहि राज्य हे॥६९॥
युद्धस्व मा धृतिं कृत्वा शौर्यमालम्ब्य राक्षस।
मच्छरैस्त्वं रणे शान्तस्तत: पूतो भविष्यसि॥७०॥

धैर्य धारुनि शौर्याने युद्ध करी मजसवे।
होशील मम बाणांनी शान्त अन् निष्पाप तू॥७०॥(मरशील मम बाणांनी निष्पाप मग् होशिल्)
यद्याविशसि लोकांस्त्रीन् पक्षीभूतो निशाचर।
मम चक्षु:पथं प्राप्य न जीवन् प्रतियास्यसि॥७१॥
मम दृष्टिपथी येता पक्षीरूपे त्रिजगती।
फिरसी लपुनि तरी तू जीवित न राहसी॥७१॥
ब्रवीमि त्वां हितं वाक्यं क्रियतामौर्ध्वदेहिकम्।
सुदृष्टा क्रियतां लङ्का जीवितं ते मयि स्थितम्॥७२॥

तुज सांगतो हिताचे श्राद्ध स्वत:चे करुनी।
पहा जीवित असता लंका डोळे भरूनिया
कारण जिवित आता तुझे मम स्वाधिन॥७२॥
इत्युक्त: स तु तारेयोरामेणाक्लिष्टकर्मणा।
गामाकाशमाविश्यमूर्तिमानिव हव्यवाट्॥७३॥
महान् कर्म करी जो रामाने वदता असे।
अंगद मूर्त अग्नीसम आकाशमार्गी निघे॥७३॥
सोऽतिपत्य मुहूर्तेन् श्रीमान् रावणमन्दिरम्।
ददर्शासीनमव्यग्रं रावणं सचिवै: सह॥७४॥

मुहूर्तातच पोचे तो भुवनात रावणाच्या।
पाही शान्त बसलेल्या रावणास मन्त्र्यांसह॥७४॥

ततस्तस्याविदूरेण निपत्य हरिपुङ्गव:।
दीप्ताग्निसदृशस्तस्थावङ्गद: कनकाङ्गद:॥७५॥

अग्नीपरी प्रकाशित सुवर्ण बाजुबन्दासह।
रावणाच्या जवळी जाऊनि उभा राहि तो॥७५॥

तद् रामवचनं सर्वमन्यूनाधिकमुत्तमम्।
सामत्यं श्रावयामास निवेद्यात्मानमात्मना॥७६॥

स्वपरिचय देऊनि रावणास मन्त्र्यांसवे।
ऐकवी श्रीरामवचन जसेच्या तसे तो तया॥७६॥

दूतोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मण:।
वालिपुत्रोऽङ्गदो नाम यदि ते श्रोत्रमागत:॥७७॥

श्रीराम जो उत्तम कर्मे करी त्याचा दूत मी ।
ऐकले असेल नाम तो वालिपुत्र अङ्गद ॥७७॥

आह त्वां राघवो राम: कौसल्यानन्दवर्धन:।
निष्पत्य प्रतियुध्यस्व नृशंस पुरुषो भव॥७८॥

कौसल्यानन्दन राम सन्देश देतसे तुज।
मर्द होऊनि बाहेर् येउनी मजसी लढा॥७८॥
हन्तास्मि त्वां सहामात्यं सपुत्रज्ञातिबांधवम्।
निरुद्विग्नास्त्रयो लोका भविष्यन्ति हते त्वयि ॥७९॥
वधीन तुज मी मन्त्री पुत्रबन्धुबान्धवांसह्।
होतील निर्भय प्राणी त्यामुळे तिन्ही लोकांतिल॥७९॥
देवदानवयक्षाणां गन्धर्वोरगरक्षसाम्।
शत्रुमयोधरिष्यामि त्वामृषीणां च कण्टकम्॥८०॥

देवता दानव यक्ष नाग राक्षस सर्वांचा ।
शत्रु तू कण्टकरूप ऋषींच्यास्तव आज मी।
उखडुनी आज देईन फेकुनी त्यास्तव तुला॥८०॥
बिभीषणस्य चैश्वर्यं भविष्यति हते त्वयि।
न चेत् सत्कृत्य विदेहीं प्रणिपत्य प्रदास्यसि॥८१॥
मज आदरे नमुनी न करसी परत जर।
सीतेस तर मारला जाशील माझ्याकडूनी।
मरता तू ऐश्वर्य हे होईल प्राप्त बिभीषणा॥८१॥

इत्येवं परुष् वाक्यं ब्रुवाणे हरिपुङ्गवे।
अमर्षवशमापन्नो निशाचरगणेश्वर:॥८२॥
अङ्गदाचे कपिश्रेष्ठ कठोर वच ऐकुनी।
अतिशय क्रुद्ध होई राक्षसराज रावण॥८२॥
तत: स् रोषमापन्न: शशास सचिवांस्तदा।
गृह्यतामिति दुर्मेधा वध्यतामिति चासकृत्॥८३॥
रागाने मन्त्र्यांस सांगे वारंवार पकडुनी।
वानरास या दुर्बुद्धि मारुनी टाका तया॥८३॥

रावणस्य वच: श्रुत्वा दीप्ताग्निमिव तेजसा।
जगुहुस्तं ततो घोराश्चत्वारो रजनीचरा:॥८४॥

ऐकुनि वचना त्याच्या चार घोर निशाचर।
पकडती अग्नीसम प्रदीप्त अङ्गदा तदा॥८४॥

ग्राहयामास तारेय: स्वयमात्मानमात्मवान्।
बल् दर्शयितुं वीरो यातुधानेगणे तदा ॥८५॥

आत्मबलसंपन्न तो बल दाखविण्या राक्षसां।
स्वत:स पकडुनि घेई ताराकुमार् अंगद॥८५॥

स तान् बाहुद्यासक्तानादाय पतगानिव।
प्रासादं शैलसंकाशमुत्पपाताङ्गदस्तदा॥८६॥
चार राक्षसांसवे त्या जखडलेल्या भुजावर।
पक्ष्यासम उडुनी बैसे प्रासादशिखरावरी॥८६॥
तस्योत्पतनवेगेन निर्धूतास्तत्र राक्षसा:।
भूमौ निपतिता: सर्वे राक्षसेन्द्रस्य पश्यत:॥८७॥
उड्डाणवेगे राक्षस ते निसटुनी बाहूतुनी।
आदळती भूमीवरि राक्षसराज पाहता॥८७॥

ततः प्रासदशिखरं सैलशृङ्गमिवोन्नतम्।
चक्राम राक्षसेन्द्रस्य वालिपुत्रप्रतापवान्॥८८॥
गिरिशिखरासम उंच प्रासादशिखरावरी।
रावणाच्या पाय टेकुनी फिरू लागतसे॥८८॥
पफाल च तदाक्रान्तं दशग्रीवस्य पश्यतः।
पुरा हिमवतः श्रूङ्गं वज्रेणेव विदारितम्॥८९॥
पायांच्या घर्षणे फाटे छत ते पहातापाहता।
वज्राघाते विदीर्ण झाले हिमालयशिखर जसे॥८९॥

भक्त्वा प्रासादशिखरं नाम् विश्राव्य चात्मन:।
विनद्य सुमहानादमुत्पपात विहायसा॥९०॥
छत प्रासादाचे ऐसे तोडुनी सिंहानादासवे।
आकाशमार्गे उडुनी जाई स्वनाम सांगत॥९०॥
व्यथयन् राक्षसान् सर्वान् हर्षयश्चापि वानरान्।
स वानराणां मध्ये तु रामपार्श्वमुपागत:॥९१॥
पीडुनी राक्षसांना अन् आनन्दवुनि वानरां।
येई वानरसेनेत श्रीरामापाशी परत तो॥९१॥

रावणस्तु परं चक्रे क्रोधं प्रासादधर्षणात्।
विनाशं चात्मन: पश्यन् नि:श्वासपरमोऽभवत्॥९२॥

पाही तुटता प्रासाद संतप्त रावण होतसे।
येता पाहुनि विनाशक्षण दीर्घ श्वास घेतसे॥९२॥

रामस्तु बहुभिर्हृष्टैर्विनदद्भि: प्लवङ्गमै:।
वृतो रिपुवधाकांक्षी युद्धायैवाभ्यवर्तत॥९३॥

श्रीरामहि करि हर्षाने गर्जना वानरांसवे।
होतसे सज्ज युद्धास करण्या शत्रुचा वध॥९३॥

सुषेणस्तु महावीर्यो गिरिकूटोपमो हरि:।
बहुभ: संवृतस्तत्र वानरै: कामरूपिभि:॥९४॥
स तु द्वाराणि संयम्य सुग्रीववचनात् कपि:।
पर्यक्रामत दुर्धर्षो नक्षत्राणीव चन्द्रमा:॥९५॥

सुषेण पर्वतासम विशालकाय पराक्रमी।
सुग्रीवाच्या आज्ञेने कामरूपी वानरांसह॥९४॥
कब्जा करूनि लंकेच्या सर्व द्वारांवरी फिरे।
जसा सर्व नक्षत्रावरी चन्द्रमा गमन करी॥९५॥

तेषामक्षौहिणिशतं समवेक्ष्य वनौकसाम्।
लङ्कामुपनिविष्टानां सागरं चाभिवर्तताम्॥९६॥
राक्षसा विस्मयं जग्मुस्त्रासं जग्मुस्तथापरे।
अपरे समरे हर्षाद्धर्षमेवोपपेदिरे॥९७॥

घालुनी लंकेभवती वेढा शत अक्षौहिणि।
पाहुनी वानरसेना समुद्रापर्यन्त पसरली॥९६॥
राक्षसा विस्मय वाटे काही भयभीत् त्यातिल।
अन्य काही रणे होती हर्ष उत्साह भरित॥९७॥

कृत्स्नं हि कपिभिर्व्याप्तं प्राकारपरिखान्तरम्।
ददृशू राक्षसा दीना: प्राकारं वानरीकृतम्।
हाहाकारमकुर्वन्त राक्षसा भयमागता:॥९८॥

सर्व द्वारे तशी भूमी त्यासमयी लंकेतली।
वानरांनी व्याप्त केलेली पाहूनिया।
दीन भयभीत राक्षस हाहाकार करु लागती॥९८॥

तस्मिन् महाभीषणके प्रवृत्ते कोलाहले राक्षसराजयोधा:।
प्रगृह्य रक्षांसि महायुधानि युगान्तवाता इव संविचेरु:॥९९॥

आरम्भ महाभीषण तेथ होता कोलाहलाचा रावणराज योद्धे।
हातात घेउनि महान् आयुधे विचरति प्रचण्ड वायुसम युगान्ती॥९९॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकचत्वारिंश: सर्ग:॥४१॥

युद्धकाण्ड सर्ग ४२

ततस्ते राक्षसास्तत्र गत्वा रावणमन्दिरम्।
न्यवेदयन् पुरीं रुद्धां रामेण सह वानरै:॥१॥
रावणमन्दिरी जाउनी राक्षस वदती तया।
पुरी पूर्ण घेरलेली वानरांनी रामासह॥१॥
रुद्धां तु नगरीं श्रुत्वा जातक्रोधो निशाचर:।
विधानं द्विगुणं कृत्वा प्रासादं चाप्यरोहत॥२॥

घेरली पुरी ऐकोनी क्रोधी होतसे रावण।
बन्दोबस्त दुप्पट करुनी शिरे महाली पुन्हा॥२॥
स ददर्श वृतां लंकां सशैलवनकाननाम्।
असंख्येयैर्हरिगणै:सर्वतो युद्धकातिभि:॥३॥
पाही तो सर्व लङ्का वन पर्वत काननासह ।
व्याप्त युद्धाभिलाषी असंख्य वानरगणे॥३॥
स दृष्ट्वा वानरै सर्वैर्वसुधां कपिलीकृताम्।
कथं क्षपयितव्या: स्युरिति चिन्तापरोऽभवत्॥४॥

पाहि तो वसुधा सर्व कपिलवर्ण वानरे।
आच्छादित चिन्तितही त्यांच्या विनाशास्तव॥४॥
स चिन्तयित्वा सुचिरं धैर्यमालम्ब्य रावण:।
राघवं हरियूथांश ददर्शायतलोचन:॥५॥
चिन्ता करित ऐसी करुनी धैर्य धारण।
वानरसेना श्रीरामा पुन्हा न्यहाळी रावण॥५॥
राघव: सह सैन्येन मुदितो नाम पुप्लुवे।
लङ्कां ददर्श गुप्तां वै सर्वतो राक्षसैर्वृताम्॥६॥

जाता सैन्यासह श्रीराम प्रसन्नतापूर्वक् पुढे।
पाहती राक्षसे आवृत्त लंका सुरक्षित असे॥६॥
दृष्ट्वा दाशरथिर्लंका चित्रध्वजपताकिनीम्।
जगाम सहसा सीतां दूयमानेन चेतसा॥७॥
ध्वजपतांकित लंका पाहुनी दशरथनन्दन। ।
व्यथित चित्ते स्मरण सीतेचे लागले करू॥७॥
अत्र सा मृगशावाक्षी मत्कृते जनकात्मजा ।
पीड्यते शोकसंतप्ता कृशा स्थण्डिलशायिनी॥८॥

येथ मृगनयनी ती माझ्यास्तव जनकात्मजा।
शोकपीडित संतप्त शयन भूमीवरी करी ॥८॥
निपीड्यमानां धर्मात्मा वैदेहीमनुचिन्तयन्।
क्षिप्रमाज्ञापयद् रामो वानरान् द्विषतां वचे॥९॥
राक्षसे पीडित सीतेचे करुनी चिन्तन सदा।
श्रीराम वानरां आज्ञापी वधण्यास्तव राक्षसां॥९॥
एवमुक्ते तु वचसि रामेणाक्लिष्टकर्मणा।
संघर्षमाणा: प्लवगा: सिंहनादैरनादयन्॥१०॥

आज्ञा श्रीरामाने ऐसी देता लढणारे वानर।
सरसावति पुढे जाण्या सिंहनाद करोनिया॥१०॥
शिखरैर्विकिरामैतां लङ्कां मुष्टिभिरेव वा।
इति स्म दधिरे सर्वे मनांसि हरियूथपा:॥११॥
वर्षाव गिरिशिखरांचा करू वा बुक्क्या मारुनी।
लंकेचा करू नाश निश्चय हा करुनी उभे॥११॥
उद्यम्य गिरिशृङ्गाणि महान्ति शिखराणि च।
तरूंश्चोत्पाट्य विविधांस्तिष्ठन्ति हरियूथपा:॥१२॥

उचलुनी गिरिशिखरे वृक्ष नाना प्रकारचे।
उपटुनी प्रहार करण्या उभे वानरसेनापती॥१२॥
प्रेक्षतो राक्षसेन्द्रस्य तान्यनीकानि भागश:।
राघवप्रियकामार्थं लङ्कामारु रुहुस्तदा॥१३॥
राक्षसराजा देखत विभागलेले सैनिक।
चढती तटावर लंकेच्या प्रिय करण्या राघवा॥१३॥
ते ताम्रवक्त्रा हेमाभा रामार्थे त्यक्तजीविता:।
लङ्कामेवाभ्यवर्तन्त सालभूधरयोधिन:॥१४॥

श्रीरामाकरिता देण्या प्राणही असति उद्युक्त् ते।
सालवृक्ष गिरिशिखरे योजुनी करती युद्ध ते।
त्यामुळे आक्रमण करती सर्व ते लंकेवरी॥१४॥
ते द्रुमै: पर्वताग्रैश्च मुष्टिभिश्च प्लवंगमा:।
प्राकाराग्राण्यसंख्यानि ममन्थुस्तोरणानि च॥१५॥
वृक्ष पर्वतशिखरे आणि बुक्क्यांचा वर्षाव।
करुनी तटबन्दी नि द्वारे तोडाया ते लागती॥१५॥
परिखान् पूरयन्तश्च प्रसन्नसलिलाशयान्।
पांसुभि: पर्वताग्रैश्च तृणै: काष्ठैश्च वानरा:॥१६॥

जले स्वच्छ भरलेल्या खन्दकात तृण धूळ।
पर्वताग्रे काष्ठे टाकुनी भरति वानर॥१६॥
ततः सहस्रयूथाश्च कोटियूथाश्च् यूथपाः।
कोटियूथशताश्चान्ये लङ्कामारुरुहुस्तदा॥१७॥
वानरनायक कोटी सहस्र शतकोटी कपींचे।
त्यासमयी लंकेच्या किल्ल्यावर चढु लागले॥१७॥
काञ्चनानि प्रमर्दन्तस्तोरणानि प्लवङ्गमाः।
कैलासशिखरामाणि गोपुराणि प्रमथ्य च॥१८॥

आप्लवन्त: प्लवन्तश्च गर्जन्तश्च प्लवंगमा:।
लङ्कां तामभिधावन्ति महावारणसंनिभा:॥१९॥
सुवर्ण द्वारे धुळीस मिळवती ते वानर।
कैलासशिखरासम उच्च चढुनी गोपुरांवरी॥१८॥
त्यावरी उड्या मारुनि करूनिया गर्जना।
गजासम विशालकाय ते लंकेवरी धावती॥१९॥
जयत्युरुबलो रामो लक्ष्मणश्च महाबल:।
राजा जयति सुग्रीवो राघवेणाभिपालित:॥२०॥

इत्येवं घोषयन्तश्च गर्जन्तश्च प्लवङ्गमा:।
अभ्यधावन्त लङ्काया: प्राकरं कामरूपिण:॥२१॥

जयहो बलशाली राम जय महाबलि लक्ष्मण।
राघवे रक्षित सुग्रीव होवो त्याचाहि विजय॥२०॥
घोषणा करुनी ऐशा आणि गर्जत वानर।
कामरूपी वानर ते तुटून पडती तटावरी॥२१॥

वीरबाहु: सुबाहुश्च नलश्च पनसस्तथा।
निपीड्योपनिविष्टास्ते प्राकरं हरियूथपा:।

एतस्मिन्नन्तरे चक्रु: स्कन्धावारनिवेशनम्॥२२॥

त्यासमयी वीरबाहु पनस सुबाहु नल।

तटावरी चढुनी बसती आणि तशामधे।

तळ आपल्या सैन्याचा त्यांनी तेथे टाकला॥२२॥

पूर्वद्वारं तु कुमुद: कोटिभिर्दशभिर्वृत:।

आवृत्य बलवांस्तस्थौ हरिभिर्जितकाशिभि:॥२३॥

लंकेच्या पूर्वद्वारि दशकोटी वानरांसवे।

विजयश्री शोभित कुमुद घेरुनी राहे उभा॥२३॥

सहायार्थे तु तस्यैव निविष्ट: प्रघसो हरि:।
पनसश्च महाबाहुर्वानरैरभिसंवृत:॥२४॥
सहाय्यास त्याच्या येती अन्य वानरांसवे।
पनस आणि प्रघस येउनि मिळती तयां॥२४॥
दक्षिणद्वारमासाद्य वीर: शतबलि: कपि:।
आवृत्य बलवांस्तस्थौ विंशत्या कोटिभिर्वृत:॥२५॥
येउनी दक्षिण द्वारी वीस कोटी कपींसवे।
घेरुनिया शतबलि वीर टाकतसे तळ तिथे॥२५॥

सुषेण: पश्चिमद्वारं गता तारापिता बली।
आवृत्य बलवांस्तस्थौ कोटिकोटिभिरावृत:॥२६॥
करुनी पश्चिमद्वारी आक्रमण तारापिता।
वानरांसह कोटिकोटि सुषेण घेरुनि उभा ॥२६॥
उत्तरद्वारमागम्य राम: सौमित्रिणा सह।
आवृत्य बलवांस्तस्थौ सुग्रीवश्च हरीश्वर:॥२७॥
सौमित्रासह बलवान श्रीराम सुग्रीवासह।
येउनी उत्तर द्वारी घेरुनि राहती उभे॥२७॥

गोलाङ्गलो महाकायो गवाक्षो भीमदर्शना।

वृत: कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वत:॥२८॥

गोलाङ्गल महाकाय गवाक्ष महापराक्रमि।

कोटि वानरांसहित श्रीरामाच्या मागे उभे॥२८॥गोलांगल ही वानराची एक जात.गवाक्ष त्याचे नांव

ऋक्षाणां भीमकोपानां धूम्र: शत्रुनिबर्हण:।

वृत्त: कोट्या महावीर्यस्तथौ रामस्य पार्श्वत:॥२९॥

ऋक्षराज भयानक कोपी धुम्र शत्रुसूदन ।

दुसऱ्या बाजुस रामाच्या कोटि ऋक्षांसह ॥२९॥

संनद्धस्तु महावीर्यो गदापाणिर्बिभीषण:।
वृतो यत्तैस्तु सचिवैस्तस्थौ यत्र महाबल:॥३०॥
बिभीषण महावीर हाती घेउनिया गदा।
सावध मन्त्र्यांसमवेत श्रीरामाजवळी उभे॥३०॥
गजो गवाक्षो गवय: शरभो गन्धमादन:।
समन्तात् परिधावन्तो ररक्षुहरिवाहिनीम्॥३१॥
गवय गज गवाक्ष गन्धमादन शरभ।
फिरुनी सर्वबाजूनी वानरसेनेस रक्षिती॥३१॥

ततः कोपपरीतात्मा रावणो राक्षसेश्वरः।
निर्याणं सर्वसैन्यानां द्रुतमाज्ञापयत् तदा॥३२॥

तेव्हां अत्यन्त क्रोधे राक्षसराज रावण।
आज्ञापी आपुल्या सैन्या येण्या बाहेर त्वरित॥३२॥

एतच्छ्रुत्वा तदा वाक्यं रावणस्य मुखेरितम्।
सहसा भीमनिर्घोषमिक्ष्वाकुष्टं रजनीचरैः॥३३॥

रावणाचा हा आदेश बाहेर पडण्याचा ऐकुनी।
भयानक गर्जना ते करती सर्व राक्षस॥३३॥

ततः प्रबोधिता भैर्यश्चन्द्रपाण्डुरपुष्करा:।
हेमकोणैरभिहता राक्षसानां समन्ततः॥३४॥

चन्द्रापरी शुभ्र मुख सुवर्णदण्डे पिटती।
वाजती डफ ऐसे राक्षसांच्या मधूनिया॥३४॥

विनेदुश्च महाघोषा: शङ्खा: शतसहस्रश:।
राक्षसानां सुघोरानां मुखमारुतपूरिता:॥३५॥

भयानक राक्षसांच्या मुखातुनि जाति फुंकले।
गम्भीर घोष करणारे लक्षलक्ष शंख तदा॥३५॥

ते बभु: शुभनीलाङ्गा सशंखा रजनीचरा:।
विद्युन्मण्डलसंनद्धा: सबलाका इवाम्बुदा:॥३६॥

राक्षस शंख फुंकता ते कृष्णवर्ण शोभती।
विद्युतमण्डल युक्त नीलमेघ पंक्तीसम॥३६॥

निष्पतन्ति तत: सैन्या हृष्टा रावणचोदिता:।
समये पूर्वमाणस्य वेगा इव महोदधे:॥३७॥

प्रेरणेने रावणाच्या हर्षाने सर्व सैनिक।
पडती युद्धास बाहेर समुद्राच्या लाटांपरी॥३७॥

ततो वानरसैन्येन मुक्तो नाद: समन्तत:।
मलय: परितो येन ससानप्रस्थकन्दर:॥३८॥

नन्तर वानरसैनिक करती सिंहनाद महा।
गिरिकन्दरासह तेव्हां दुमदुमे मलय पर्वत॥३८॥

शङ्खदुन्दुभिनिर्घोष: सिंहनादस्तरस्विनाम्।
पृथिवीं चान्तरिक्षं च सागरं चाभ्यनादयत्॥३९॥

गजानां बृंहितै: सार्धं हयानां हृषितैरपि।
रथानां नेमिनिर्घोषै रक्षसां वदनस्वनै:॥४०॥

घरघराट रथआसांचा हत्तींचा चित्कार ।
फुरफुरणे घोड्यांचे शंखदुन्दुभि नादही॥३९॥
आवाजे राक्षसांच्या वानरांच्या निनादे तसे।
निनादित भू आकाश समुद्रासह सर्व हे ॥४०॥
एतस्मिन्नन्तरे घोर: संग्राम: समपद्यत।
रक्षसां वानरानां च यथा देवासुरे पुरा॥४१॥
येवढ्यात सुरू होई घोर संग्राम त्यातिथे।
वानरा राक्षसांचा पूर्वी देवदैत्यांचा जसा॥४१॥

ते गदाभि: प्रदीप्ताभि: शक्तिशूलपरश्वधै:।
निजघ्नुर्वानरान् सर्वान् कथयन्त: स्वविक्रमान्॥४२॥
राक्षस घेऊनि गदा शक्ति शूल फरशांसह।
वानरां मारण्याची स्वपराक्रमे करति घोषणा॥४२॥
तथा वृक्षैर्महाकाया: पर्वताग्रैश्च वानरा:।
निजघ्नुस्तानि रक्षांसि नखैर्दन्तैश्च वेगिन:॥४३॥
वानरहि महाकाय गिरिशिखरासह महा।
वृक्ष मोठे नखे दांत चालविती राक्षसांवरी॥४३॥

राजा जयति सुग्रीव इति शब्दो महानभूत्॥४४॥

जय हो सुग्रीव राज बोलती वानर असे।

करती जयजयकार रावणाचाहि राक्षस॥४४॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विचत्वारिंश: सर्ग:॥४२॥

युद्धकाण्ड सर्ग ४३

युद्धतां ततस्तेषां वानराणां महात्मनाम्।
रक्षसां सम्बभूवाथ बलरोष: सुदारुण:॥१॥
नन्तर युद्ध करता वानर आणि राक्षसा।
पाहुनी परस्परसेना रोष होई भयंकर॥१॥
ते हयै: काञ्चनापीडैर्गजैश्चाग्निशिखोपमै:।
रथैश्चादित्यसंकाशै: कवचैश्च मनोरमै:॥२॥

निर्ययू राक्षसा वीरा नादयन्तो दिशो दश।
राक्षसा भीमकर्माणो रावणस्य जयैषिण:॥३॥
अश्व गज सुवर्णाभूषित रथ अग्निशिखेसम।
सूर्यतुल्य तेजस्वी कवचयुक्त मनोरम॥२॥
राक्षसवीर गर्जत निघती दशदिशांस।
जे भीमकर्मी असती रावण विजयोत्सुक॥३॥
वानराणामपि चमूर्बहती जयमिच्छताम्।
अभ्यधावत तां सेनां रक्षसां घोरकर्मणाम्॥४॥

विशाल वानर सेना श्रीरामविजयोत्सुक।
हल्ला करति घोरकर्मी राक्षससेनेवरी॥४॥
एतस्मिन्नंतरे तेषामन्योन्यमभिधावताम्।
रक्षसां वानराणां च द्वन्द्वयुद्धमवर्तत॥५॥
तितुक्यात एकमेकांवर धावत असति जे।
राक्षस वानर यांत द्वन्द्वयुद्ध होई सुरू॥५॥
अङ्गदेनेन्द्रजित्सार्धं वालिपुत्रेण राक्षसः।
अयुध्यत महातेजास्त्र्यम्बकेण यथान्धकः॥६॥

वालिपुत्र अङ्गदासवे भिडे इन्द्रजित ऐसा।
जैसा अन्धकासुर त्रिनेत्रधारी शंकरासवे॥६॥
प्रजङ्ग्रेन च सम्पातिर्नित्यं दुर्धर्षणो रणे।
जम्बुमालिनमारब्धो हनूमानपि वानरः॥७॥
प्रजङ्घ्र राक्षसासवे सम्पाति रणदुर्जय।
जम्बुमालीसवे हनूमान युद्धा आरम्भती॥७॥
संगतस्तु महाक्रोधो राक्षसो रावणानुजः।
समरे तीक्ष्णवेगेन शत्रुजेन बिभीषणः॥८॥

रावणानुज महाक्रोधे बिभीषण समराङ्गणी।
प्रचंड वेगशाली शत्रुघ्ना युद्धात भिडतसे॥८॥
तपनेन गज: सार्ध् राक्षसेन महाबल:
निकुम्भेन महातेजा नीलोऽपि समयुध्यत॥९॥
महाबली गज लढे तपन राक्षसासवे।
महातेजस्वी नील निकुम्भ राक्षसासवे॥९॥
वानरेन्द्रस्तु सुग्रीव: प्रघसेन सुसंगत:।
संगत: समरे श्रीमान् विरूपाक्षेण लक्ष्मण:॥१०॥

वानरराज सुग्रीव प्रघसासवे युद्ध करी।
तर विरुपाक्षासवे श्रीमान लक्ष्मण लढे॥१०॥
अग्निकेतु: सुदुर्धर्षो रश्मिकेतुश्च राक्षस:।
सुप्तघ्नो यज्ञकोपश्च रामेण संगता:॥११॥
अग्निकेतु रश्मिकेतु सुतघ्न नि यज्ञकोप।
राक्षस सर्व झुंजती श्रीरामचन्द्रासवे ॥११॥
वज्रमुष्टिश्च मैन्देन द्विविदेनाशनिप्रभ:।
राक्षसाभ्यां सुघोराभ्यां कपिमुख्यो समागतौ॥१२॥

मैन्दासवे वज्रमुष्टि द्विविदाशी अशनिप्रभ।
ऐसे कपिशिरोमणि घोर दोन राक्षसांसवे॥१२॥
वीर: प्रतपनो घोरो राक्षसो रणदुर्धर:।
समरे तीक्ष्णवेगेन नलेन समयुध्यत॥१३॥
प्रतपन वीर घोर राक्षस रणदुर्धर।
वेगशाली नलासवे करू लागे युद्ध रणी ॥१३॥
धर्मस्य पुत्रो बलवान् सुषेण इति विश्रुत:।
स विद्युन्मालिना सार्धमयुध्यत महाकपि:॥१४॥

बलवान् पुत्र धर्माचा सुषेण नावे प्रसिद्ध।
विद्युन्माली राक्षसासह रणी लढू लागला॥१४॥
वानराश्चापरे घोरा राक्षसैरपरै: सह।
द्वन्द्वं समीयु: सहसा युद्ध्वा च बहुभि: सह॥१५॥
ऐसे कपिवीर युद्ध करोनी अनेकांसवे।
आणखी करती द्वंद्व दुसऱ्या राक्षसांसवे॥१५॥
तत्रासीत् सुमहद् युद्धं तुमुलं रोमहर्षणम्।
रक्षसां वानराणां च वीराणां जयमिच्छताम्॥१६॥

युद्ध रोमांचकारी राक्षसां वानरांमध्ये।
चाले विजय मिळवण्या दोघेही उत्सुक॥१६॥

हरिराक्षसदेहेभ्य: प्रभूता: केशशाबला:।
शरीरसंघाटवहा: प्रसुसु: शोणतापगा:॥१७॥

कपिराक्षस देहातुन् रक्ताचे पाट वाहती।
प्रेते वीरांची त्यात काष्ठासम वाहती॥१७॥

आजघानेन्द्रजित् क्रुद्धो वज्रेणेव वज्रेणेव शतक्रतु:।
अङ्गदं गदया वीरं शत्रुसैन्यविदारणम्॥१८॥

वज्राचा जसा इन्द्र तसा मेघनाद इन्द्रजित्।
करी आघात गदेचा महावीर अङ्गदावरी॥१८॥
तस्य काञ्चनचित्राङ्गं रथं साश्वं ससारथिम्।
जघान श्रीमानङ्गदो वेगवान् हरि:॥१९॥
पकडुनी त्याच गदेने सुवर्णजडित रथ तो।
सारथी अश्वासह चूर चूर करि अंगद॥१९॥
सम्पातिस्तु प्रजङ्ग्रेन त्रिभिर्बाणै: समाहत:।
निजघानाश्वकर्णेन प्रजङ्गम् रणमूर्धनि॥२०॥

प्रजंघ करि घायाळ तीन बाणे सम्पातीस।
तेव्हां अश्वकर्ण वृक्षाने वधे सम्पाती तया॥२०॥
जम्बुमाली रथस्थस्तु रथशक्त्या महाबल:।
बिभेद समरे क्रुद्धो हनूमन्त स्तनान्तरे॥२१॥
जम्बुमाली रथातील आघात रथशक्तीने ।
हनुमान वक्षस्थल क्रोधाने जखमी करी॥२१॥
तस्य तं रथमास्थाय हनूमान् मारुतात्मज:।
प्रममाथ तलेनाशु सह तेनैव रक्षसा ॥२२॥

परि रथी त्याच चढुनी थप्पड त्यास मारुनी।
हनूमान रथासह जम्बुमालीचा वध करी॥२२॥
नदन् प्रतपनो घोरो नलं सोऽभ्यनुधावत।
नल: प्रतपनस्याशु पातयामास चक्षुषी ॥२३॥
भिन्नगात्र: शरैस्तीक्ष्णै: क्षिप्रहस्तेन रक्षसा।
राक्षस प्रतपन घोर गर्जुनि धावे नलाकडे।
करी क्षतविक्षित त्या तीक्ष्ण बाणे आपुल्या॥२३॥
तत्काल नलाने त्याचे दोन्ही डोळे फोडले।

ग्रसन्तमिव सैन्यानि प्रघसं वानराधिप:॥२४॥
सुग्रीव: सप्तपर्णेन निजघान जवेन च।
पाहुनी प्रघस राक्षस कपिसैन्या स मारता॥२४॥
सप्तपर्ण वृक्षाने सुग्रीव वध त्याचा करी।
प्रपीड्य शरवर्षेण राक्षसं भीमदर्शनम्॥२५॥
निजघान विरूपाक्षं शरेणेकैन लक्ष्मण:।
शरवर्षे विरुपाक्षा लक्ष्मण पीडा देतसे॥२५॥
शेवटी मारुनी एक तीर त्यास वधतसे।

अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः।
सुप्तघ्नो यज्ञकोपश्च रामं निर्बिभिदुः शरैः॥२६॥
अग्निकेतु रश्मिकेतु यज्ञकोप सुतघ्न हे।
राक्षस तीरे करती घायाळ श्रीरामचन्द्रा॥२६॥
तेषां चतुर्णां रामस्तु सिरांसि समरे शरैः।
क्रुद्धश्चतुर्भिश्चिच्छेद घोरैरग्निशिखोपमैः॥२७॥
अग्निशिखेसम तीरे भयंकर रणाङ्गणी।
क्रुद्ध श्रीराम चौघांची मस्तके टाकि कापुनी॥२७॥

वज्रमुष्टिस्तु मैन्देन मुष्टिना निहतो रणे।
पपात सरथः साश्वः पुराट्ट इव भूतले॥२८॥

वज्रमुष्टिवर मैन्द प्रहार बुक्क्यांचे करी।
ज्यामुळे रथ घोड्यासह पडे तो पृथ्वीवरी।
जणु विमान देवांचे धराशायी होतसे ॥२८॥

निकुम्भस्तु रणे नीलं नीलाञ्जनचयप्रभम्।
निर्विभेद सरैस्तीक्ष्णैः करैर्मेघमिवांशुमान्॥२९॥

निकुम्भ तीक्ष्ण बाणांनी कृष्णवर्ण नीला करी।
छिन्नभिन्न जशी मेघांस सूर्यकिरणे फाडती॥२९॥
पुनः शरशतेनाथ क्षिप्रहस्तो निशाचरः।
बिभेद समरे नील निकुम्भ प्रजहास च॥३०॥
परिनिकुम्भ वेगाने शतबाणे करि नीलास।
आणी करुनी ऐसे जोरजोरात हासत॥३०॥
तस्येव रथचक्रेण नीलो विष्णुरिवाहवे।
शिरश्चिच्छेदं समरे निकुम्भस्य च सारथेः॥३१॥

तेव्हां नील रथचक्रे निकुम्भ आणि सारथी।
मस्तके उडवी जैसी विष्णु दैत्यांची रणी॥३१॥

वज्राशनिसमस्पर्शो द्विविदोऽप्यशनिप्रभम्।
जघान गिरिशृङ्गेण मिषतां सर्वरक्षसाम्॥३२॥

दु:सह द्विविदाचा स्पर्श वज्र अशनि परी।
करी पर्वतशिखराचा प्रहार अशनिप्रभावरी॥३२॥

द्विविदं वानरेन्द्रं तु दुमयोधिनमाहवे।
शरैरशनिसंकाशै: स विव्याधाशनिप्रभ:॥३३॥

तदा त्या वृक्षाने युद्ध करणाऱ्या द्विविदास।
वज्रतुल्य तीरे करी घायाळ अशनिप्रभ॥३३॥
स शरैरभिविद्धाङ्गो द्विविद: क्रोधमूर्च्छित:।
सालेन सरथं साश्वं निजधानाशनिप्रभम्॥३४॥
क्षतविक्षत तीरांनी होउनी अतिक्रोधित।
वृक्षाने रथ अश्वासह अशनिप्रभास वधी ॥३४॥
विद्युन्माली रथस्थस्तु शरै: काञ्चनभूषणै:।
सुषेण ताडयामास ननाद मुहुर्मुहु:॥३५॥

सुवर्णभूषित बाणांनी विद्युन्माली रथातिल।
सुषेणा करि घायाळ जोरजोरात गर्जुनी॥३५॥
तं रथस्थमथो दृष्ट्वा सुषेणो वानरोत्तम:।
गिरिशृङ्गेण महता रथमाशु न्यपातयत्॥३६॥
रथात पाहुनि त्याला सुषेण वानरोत्तम।
विशाल पर्वतशिखरे टाकी रथा मोडुनि॥३६॥
लाघवेन तु संयुक्तो विद्युन्माली निशाचर:।
अपक्रम्य रथात् तूर्णं गदापाणि: क्षितौ स्थित:॥३७॥

उडी मारी रथातून विद्युन्माली निशाचर।
गदा घेउनि हाती राहे धरतीवरी उभा॥३७॥

ततः क्रोधसमाविष्टः सुषेणो हरिपुङ्गवः।
शिलां सुमहतीं गृह्य निशाचरमभिद्रवत्॥३८॥

तदा क्रोधाने सुषेण घेउनी विशाल शिळा।
जातसे अतिवेगाने निशाचराकडे धावुनी॥३८॥

तमापतन्तं गदया विद्युन्माली निशाचरः।
वक्षस्यभिजघानाशु सुषेणं हरिपुङ्गवम्॥३९॥

सुषेणा आक्रमण करण्या येता पाहुनि निशाचर्।
विद्युन्माली त्यावर गदेचा प्रहार करी॥३९॥

गदाप्रहारं तं घोरमचिन्त्य प्लवगोत्तम:।
तां तूष्णीं पातयामास तस्योरसि महानृधे॥४०॥

पर्वा न करता त्याची घेउनी ती विशाल शिळा।
वक्षस्थळी घाव घाली विद्युन्मालीच्या रणी॥४०॥

शिलाप्रहाराभिहतो विद्युन्माली निशाचर:।
निष्पिष्टहृदयो भूमौ गतासुर्निपपात ह॥४१॥

घायाळ शिलाप्रहारे विद्युन्माली निशाचर।
पडला फुटुनी छाती प्राणहीन भूमीवरी॥४१॥
एवं तैर्वानरैः शूरैः शूरास्ते रजनीचराः।
द्वन्द्वे विमथितास्तत्र दैत्या इव दिवौकसैः॥४२॥
शौर्यसंपन्न वानरवीर द्वंद्वात निशाचरां ।
काढती पिटुनी जैसे दैत्य देवांकडुनी हत॥४२॥
भल्लैश्चान्यैर्गदाभिश्च शक्तितोमरसायकैः।
अपविद्धैश्चापि रथैस्तथा सांग्रामिकैर्हयैः॥४३॥

निहतै: कुञ्जरैर्मत्तैस्तथा वानरराक्षसै:।
चक्राक्षयुगदण्डैश्च भग्नैर्धरणिसंश्रितै:॥४४॥
बहूवायोधनं घोरं गोमायुगणसेवितम्।
कबन्धानि समुत्पेतुर्दिक्षु वानरराक्षसाम्।
विमर्दे तुमुले तस्मिन देवासुररणोपमे॥४५॥

भाले तोमर सायक गदा शक्ति शस्त्रे अशी।
फेकलेले तुटल्याने रथ अश्वासह मृत॥४३॥
मृत मत्त हत्ती मृत वानर राक्षसही तसे।

रथाचे अक्ष तुटलेले पडलेले धरतीवरी॥४४॥
भयानक युद्धभूमीवर गिधाडांचे चमू।
धडे मस्तकरहित विखुरलेली सर्वत्र ।
संग्रामात भयानक देवासुरांच्या ती जणु॥४५॥
निहत्यमाना हरिपुङ्गवैस्तदा निशाचरा: शोणितगन्धमूच्छिता:।
पुन: सुयुद्धं तरसा समाश्रिता दिवाकरस्यास्तमयाभिकातिण:॥४६॥
निशाचर मारलेले वानरांनी रक्तगन्धे मूच्छित असल्यामुळे।
प्रतीक्षा सूर्यास्ताची करती पुन्हा होण्या युद्धास्तव तत्पर॥४६॥

सूर्यास्तानन्तर पूर्ण रात्रीत राक्षसांचे बळ वाढते त्यामुळे सूर्यास्ताची ते प्रतीक्षा करत होते.

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिचत्वारींश: सर्ग:॥४३॥

युद्धकाण्ड सर्ग ४४

युद्धतामेव तेषां तु तदा वानररक्षसाम्।
रविरस्तं गतो रात्रि: प्रवृत्ता प्राणहारिणी॥१॥

वानर राक्षस युद्ध चालता सूर्य मावळे।
प्राणसंहारिणी रात्रीचे आगमन होतसे॥१॥

अन्योन्यं बद्धवैराणां घोराणं जयमिच्छताम्।
सम्प्रवृत्तं निशायुद्धं तदा वानररक्षसाम्॥२॥

परस्पर वैरी दोन्ही पक्षांचे जे विजयोत्सुक।
त्यामुळे रात्रीही युद्ध त्यांचे चालु राहिले॥२॥
राक्षसोऽसीति हरयो वानरोऽसीति राक्षसा:।
अन्योन्यं समरे जघ्नुस्तस्मिंस्तमसि दारुणे॥३॥
अन्धारात एकमेका तू राक्षस की वानर।
विचारती रणी आणि करती प्रहार नन्तर॥३॥
हत दारय चैहीति कथं विद्वसीति च।
एवं सुतुमुल: शब्दस्तस्मिन् सैन्ये तु शुश्रुवे॥४॥

मारा काटा ये पुढे पळतोस का शब्द हे।
सैन्यात ऐकण्या येति सर्वत्र भयंकर असे॥४॥

काला: काञ्चनसंनाहास्तस्मिंस्तमसि राक्षसा:।
सम्प्रदृश्यन्त शैलेन्द्रा दीप्तौषधिवना इव॥५॥

सुवर्णकवच विभूषित काळोखी कृष्ण राक्षस।
दिसती औषधी वनयुक्त काळ्या पहाडासम॥५॥

तस्मिंस्तमसि दुष्पारे राक्षसा: क्रोधमिच्छता:।
परिपेतुर्महावेगा भक्षयन्त: प्लवङ्गमान्॥६॥

दुष्पार त्या अन्धारात क्रुद्ध राक्षस वानरां।
खात वेगाने त्यांच्यावरती पडती तुटूनिया॥६॥
ते हयान् काञ्चनापीडान् ध्वजांशीविषोपमान्।
आप्लुत्य दशनैस्तीक्ष्णैर्भीमकोपा व्यदारयन्॥७॥
होउनी भयानक क्रोध तीक्ष्ण दंष्ट्रे वानर।
विदीर्ण करती अश्व ध्वजा राक्षसांची महा॥७॥
वानरा बलिनो युद्धेऽक्षोभयन् राक्षसीं चमूम्।
कुञ्जरान् कुञ्जररोहन् पताकाध्वजिनो रथान्॥८॥

चकर्षश्च ददंशुश्च दशनै: क्रोधमूर्च्छिता:।
क्रोधाने मस्त होत युद्धात बलिष्ठ वानर।
हत्तीस स्वारांसह रथ ध्वजपताकांसह॥८॥
खेचुनी दातांनी भग्न करिती चावचावुनी।
लक्ष्मणश्च रामश्च शरैराशीविषोपमे॥९॥
दृश्यादृश्यानि रक्षांसि प्रवराणि निजघ्नतु:।
कधी दृश्य राक्षस अदृश्य होती तरी ॥९॥
रामलक्ष्मण उभया विषधर बाणे मारती।

तुरंगखुरविध्वस्तं रथनेमिसमुत्थितम्॥१०॥
रुरोध कर्णनेत्राणि युध्यतां धरणीरजः।
धूळ घोड्याच्या टापांनी आणि रथआसांनी॥१०॥
उडे ती बन्द योध्यांचे नेत्र कर्ण करीतसे।
वर्तमाने तथा घोरे संग्रामे लोमहर्षणे।
रुचुरौघा महाघोरा नद्यस्तत्र विसुस्रुवुः॥११॥
होता रोमाञ्चकारी घोर संग्राम असा तिथे ।
वाहती पाट रक्ताचे नदीसम भयंकर॥११॥

ततो भेरीमृदङ्गानां पणवानां च नि:स्वन:।
शङ्कनेमिस्वनोन्मिश्र: सम्बभूवाद्भुतोपम:॥१२॥
भेरी मृदंग पणव वाद्यध्वनि मिसळुनी ।
शंखनाद घरघर रथांची नाद अद्भुत होतसे॥१२॥
हतानां स्तनमानानां राक्षसानां च नि:स्वन:।
शस्तानां वानराणां च सम्बभूवात्र दारुण:॥१३॥
क्षतविक्षत् वानरांचा राक्षसांचा घायाळ जे ।
आक्रंदनाद मिळुनी हो प्रतीत भयंकर॥१३॥

हतैर्वानरमुख्यैश्च शक्तिशूलपरश्वधैः।
निहतैः पर्वताकारै राक्षसैः कामरूपिभिः।
शस्त्रपुष्पोपहारा च तत्रासीद् युद्धमेदिनी।
दुर्जेया दुर्निवेशा च शोणितास्त्रावकर्दमा॥१५॥

शक्तिशूलपरशूंनी मृत वानरप्रमुख ।
तैसे कामरूपी राक्षस पर्वताकार मृत॥१४॥
युद्धभूमीवर चिखल रक्ताचा झाल्यामुळे।
ओळखणे कठिण वाटे नकोसे राहणे तिथे।
भूमीस जणु उपहार शस्त्ररूपि पुष्पांचा॥१५॥

सा बभूव निशा घोरा हरिराक्षसहारिणी।
कालरात्रीव भूतानां सर्वेषां दुरतिक्रमा॥१६॥

कपिराक्षस संहार करणारी भयंकर।
कालरात्रीसम रात्र सर्व प्राण्यांना दुर्लय॥१६॥

ततस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे।
राममेवाभ्यवर्तन्त संहृष्टा: शरवृष्टिभि:॥१७॥

नन्तर दारुण अन्धारी हर्षोत्साहे राक्षस।
करती शरवर्षावे हल्ला श्रीरामावरी ॥१७॥

तेषामापततां शब्दः क्रुद्धानामपि गर्जताम्।
उद्धर्त इव सन्नानां समुद्राणामभूत् स्वनः॥१८॥
गर्जनाध्वनि क्रोधित राक्षसांचा भासे जसा।
प्रलयकाली कोलाहल सन्नसमुद्रांचा जणु॥१८॥
तेषां रामः शरैः षड्भिः षड् जघान निशाचरान्।
निमेषानतर्मात्रेण् शरैरग्निशिखोपमैः॥१९॥
निमिषात रामचंद्र अग्निज्वालेसम सहा ।
तीरे भयानक करी राक्षसा घायाळ तदा॥१९॥

यज्ञशत्रुश्च दुर्धर्षो महापार्श्वमहोदरौ।
वज्रदंष्ट्रो महाकायस्तौ चोभौ शुकसारणौ॥२०॥
यज्ञशत्रु,महापार्श्व महाकाय महोदर।
वज्रदंष्ट्र शुक सारण ऐसे ते असती सहा॥२०॥
ते तु रामेण बाणौघैः सर्वमर्मसु ताडिताः।
युद्धादपसृतास्तत्र सावशेषायुषोऽभवन्॥२१॥
मर्मी लागता रामबाण जाती ते युद्ध सोडुनी।
युद्धनिवृत्त झाल्याने प्राण त्यांचे वाचती॥२१॥

निमेषान्तरमात्रेण घोरैरग्निशिखोपमै:।
दिशश्चकार विमला: प्रदिशश्च महारथ:॥२२॥
अग्निशिखेसम तीरे भयंकर निमिषातच।
महारथी करी निर्मल सर्व दिशाप्रदिशासह॥२२॥
ये त्वन्ये राक्षसा वीरा रामस्याभिमुखे स्थिता:।
तेऽपि नष्टा: समासाद्य पतङ्गा इव पावकम॥२३॥
अन्य जे राक्षसवीर श्रीरामापुढती उभे।
तेही नष्ट होति जसे अग्नीत जळुनि पतङ्ग॥२३॥

सुवर्णपुलैर्विशिखै: सम्पतद्भि: समन्तत:।
बभूव रजनी चित्रा खद्योतैरिव शारदी॥२४॥
सर्वत्र पडती बाण सुवर्ण पंखांकित।
चमके त्यामुळे रात्र खद्योतासम शारदी॥२४॥
राक्षसानां च निनदैर्भेरीणां चैव नि:स्वनै:।
सा बभूव निशा भूयो घोरतराभवत्॥२५॥
राक्षसांच्या सिंहनादे भेरिनादे भयंकर।
भयानक ती रात्र होई अजुनि भयंकर॥२५॥

तेन शब्देन महता प्रवृद्धेन समन्तत:।
त्रिकूट: कंदराकीर्ण: प्रव्याहरदिवाचल:॥२६॥
प्रतिध्वनित महाशब्दे जणु त्रिकूट पर्वत।
वाटे देतसे उत्तर कोणत्यातरि प्रश्नाचे॥२६॥
गोलाङ्गला महाकायास्तमसा तुल्यवर्चस:।
सम्परिष्वज्य बाहुभ्यां भक्षयन् रजनीचरान्॥२७॥
गोलांगल महाकाय बाहुनी अतिक्रोधाने।
मारुनिया निशाचरां श्वानांस खाऊ घालती॥२७॥

अङ्गदस्तु रणे शत्रून् निहन्तुं समुपस्थित:।
रावणिं निजघानासु सारथिं च हयानपि॥२८॥

अङ्गदही शत्रुसंहार करण्या येउनी पुढे।
घायाळ इन्द्रजिता करी मारुनी अश्व सारथ्या॥२८॥

इन्द्रजित् तु रथं त्यक्त्वा हताश्वो हतसारथि:।
अङ्गदेन महाकायस्तत्रैवान्तरधीयत॥२९॥

अंगदे सारथी अश्व मारता कष्टी इन्द्रजित्।
सोडुनी रथ तेथेच अन्तर्धान पावतसे॥२९॥

तत् कर्म वालिपुत्रस्य सर्वे देवा: सहर्षिभि:।
तुष्टवु: पूजनार्हस्य तौ चोभौ रामलक्ष्मणौ॥३०॥
कृत्याची वालिपुत्राच्या या सर्व देवता ऋषी।
श्रीराम लक्ष्मणही प्रशंसा करती बहु ॥३०॥
प्रभावं सर्वभूतानि विदुरिन्द्रजितो युधि।
ततस्ते तं महात्मानं दृष्ट्वा तुष्टा: प्रधर्षितम्॥३१॥
प्रभाव इन्द्रजिताचा जाणती सर्व त्यामुळे।
पराजित अंगदे करता सर्व प्रसन्न त्यावर॥३१॥

ततः प्रहृष्टाः कपयः ससुग्रीवबिभीषणाः।
साधुसाध्विति नेदुश्च दृष्ट्वा शत्रु पराजितम्॥३२॥
पराजित पाहुनि शत्रु प्रसन्न सुग्रीव बिभीषण।
बिभीषण सुग्रीवासह प्रसन्न होती वानर॥३२॥
इन्द्रजित् तु तदानेन निर्जितो भीमकर्मणा।
संयुगे वालिपुत्रेण क्रोधां चक्रे सुदारुणम्॥३३॥
भीमकर्मा वालिपुत्र अंगदाकडुनि पराजित्।
इन्द्रजित भयंकर क्रोध प्रकट करी॥३३॥

सोऽन्तर्धानगत: पापो रावणी रणकर्शित्:।
ब्रह्मदत्तवरो वीरो रावणि: क्रोधमूर्च्छित:॥३४॥
अदृश्या निशितान् बाणान् मुमोचाशनिवर्चस:।

अन्तर्धान पावलेला क्रोधाने अचेतन।
ब्रह्मदत्तवरे वीर अदृश्य होत तेजस्वी॥३४
वज्रासम तीक्ष्ण बाणा आरंभत सोडावया।
रामं च लक्ष्मणं चैव घोरे गमयै: शरै:॥३५॥
बिभेद समरे क्रुद्ध: सर्वगात्रेषु राक्षस:।

त्या सर्पमय बाणांनी होती श्रीराम लक्ष्मण॥३५॥
दोघेही क्षतविक्षत सर्वांगी जखमा होउनी।
मायया संवृतस्तत्र मोहयन् राघवौ युधि॥३६॥
अदृश्य: सर्वभूतानां कूटयोधी निशाचर:।
बबन्ध शरबन्धेन भ्रतारौ रामलक्ष्मणौ॥३७॥
मायावृत कूटयुद्ध करी जो अदृश्य होउनी।
मोहमये रघुबन्धूना कूटयोगी निशाचर।
बन्धनात सर्पाकार टाकतसे बान्धुनी ॥३७॥

तौ तेन पुरुषव्याघ्रौ क्रुद्धेनाशीविषै: शरै:।
सहसाभिहतौ वीरौ तदा प्रेक्षन्त वानरा:॥३८॥
इन्द्रजित उभयां कृद्ध शरपाशी बान्धतसे।
वानरे पाहती तेव्हा नागपाशी बद्ध तया॥३८॥
प्रकाशरूपस्तु यदा न शक्तस्तौ बाधितुं राक्षसराजपुत्र:।
मायां प्रयोकतुं समुपाजगाम बबन्ध तौ राजसुतौ दुरात्मा॥३९॥
प्रकटरूपे युद्ध करता जेव्हां शक्य नसे बाधा करण्या राजकुमारां।
करुनी प्रयोग मायेचा उभय बन्धूस या दुरात्म्याने बान्धिले॥३९॥

इत्यार्थे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुश्चत्वारिंश:सर्ग:॥४४॥

युद्धकाण्ड सर्ग ४५

स तस्य गतिमन्विच्छन् राजपुत्र: प्रतापवान्।
दिदेशातिबलो रामो दश वानरयूथपान॥१॥
इन्द्रजितास शोधाया प्रतापी श्रीरामचन्द्र।
दश वानरयूथपाना आज्ञा देउनि पाठवी॥१॥
द्वौ सुषेणस्य दायादौ नीलं च प्लवगाधिपम्।
अङ्गदं वालिपुत्रं च शरभं च तपस्विनम्॥२॥

द्विविदं च हनूमन्तं सानुप्रस्थं महाबलम्।
ऋषभं चर्षभस्कन्धमादिदेश परंतपः॥३॥

अंगद वालिपुत्र वेगशाली वानर शरभ।
द्विविद,ऋषभस्कंद,सानुप्रस्थ महाबली।
दोन पुत्र सुषेणाचे,वानरराज नीलही।
असे दश वानरयूथ श्रीरामचन्द्र पाठवी॥३॥

ते संप्रहृष्टा हरयो भीमानुद्यम्य पादपान्।
आकाशं विविशुः सर्वे मार्गमाणा दिशो दश॥४॥

वृक्षासह मोठमोठ्या हर्षाने वानर सर्व।
धुंडाळत दशदिशा आकाशमार्गे निघती॥४॥
तेषां वेगवतां वेगमिषुभिर्वेगवत्तरै:।
अस्त्रवित् प्रमास्त्रस्तु वारयामास रावणि:॥५॥
इन्दजित् वेगवान् करुनी तीरवर्षाव ।
रोकतसे त्यांच्या वेगा अस्त्रोद्वारा उत्तम॥५॥
तं भीमवेगा हरयौ नाराचै: क्षतविक्षता:।
अन्धकारे न ददृशुर्मेघै: सूर्यमिवावृतम्॥६॥

मेघाच्छादित सूर्यासम अन्धकारे दिसे न त्या।
क्षतविक्षत बाणांनी वानरांना इन्द्रजित॥६॥
रामलक्ष्मणयोरेव सर्वदेहभिद: शरान्।
भृशमावेहयामास रावणि: समितिंजय:॥७॥
रामलक्ष्मणावरीही देहभेदी बाणवर्षा।
इन्दजित् रावणपुत्र वारंवार करीतसे॥७॥
निरन्तरशरीरौ तु तावुभौ रामलक्ष्मणौ।
क्रुद्धेनेन्द्रजिता वीरौ पन्नगै: शरतां गतै:॥८॥

इन्द्रजित विंधतसे बाणरूपधारी सर्पे।
ऐसा उभय वीरा ज्यामुळे शरीरावर।
त्यांच्या न उरे स्थान बाणाविन एकही॥८॥
तयो: क्षतजमार्गेण सुस्राव रुधिरं बहु।
तावुभौ च प्रकाशेते पुष्पिताविव किंशुकौ॥९॥
अंगावरील घावांनी बहुत रक्त वाहुनी।
दिसती ते फुललेल्या पलाश वृक्षापरी॥९॥
तत: पर्यन्तरक्ताक्षो भिन्नाञ्जनचयोपम:।
रावणिर्धांतरौ वाक्यमन्तर्धानगतोऽब्रवीत्॥१०॥

रक्ताक्ष कज्जलवर्ण इन्द्रजित अन्तर्धान।
अवस्थेत अशा बोले दोघा बन्धूंना असे॥१०॥

युध्यमानमनालक्ष्यं शक्रोऽपि त्रिदशेश्वरः।
द्रष्टमासादितुं वापि न शतः किं पुनर्युवाम्॥११॥

युद्धात् अलक्ष्य होता इन्द्रही न शके मज।
पाहण्या तर मग काय तुमची बिशाद असे॥११॥

प्रापिताविषुजालेन राघवौ कङ्कपत्रिणा।
एष रोषपरीतात्मा नयामि यमसादनम् ॥१२॥

कंकपत्रयुक्त तीरजाले तुम्हा दोघा राघवा।
धरले क्रोधाने आता पाठवतो यमलोकि मी॥१२॥
एवमुक्त्वा तु धर्मज्ञौ भ्रातरौ रामलक्ष्मणौ।
निर्बिभेद शितैर्बाणै प्रजहर्ष ननाद च॥१३॥
असे म्हणुनि धर्मज्ञ बंधुना बांधु लागला।
बाणांनी तीक्ष्ण अन् हर्षे गर्जना करु लागला॥१३॥
भिन्नाञ्जनचयोश्यामो विस्फार्य विपुलं धनुः।
भूय एव शरान् घोरान् विससर्ज महानृधे॥१४॥

कज्जलासम काळा विशाल धनु आपले।
ताणुनी घोर वर्षाव बाणांचा करु लागला॥१४॥
ततो मर्मसु मर्मज्ञो मज्जयन् निशितान् शरान्।
रामलक्ष्मणयोर्वीरो ननाद च मुहुर्मुहु:॥१५॥
जाणुनी मर्मस्थानी रामलक्ष्मणांच्या बाण तो।
आपले सोडता तीक्ष्ण गर्जतसे पुन:पुन्हा॥१५॥
बद्धौ तु शरबन्धेन तावुभौ रणमूर्धनि।
निमेषान्तरमात्रेण् न शेकतुरवेक्षितम्॥१६॥

बद्ध बाणे दोघे बन्धु निमिषे रणभूवरी।
उरे न शक्ति त्यांच्यात नेत्र हलवण्यासही ॥१६॥
ततो विभिन्नसर्वाङ्गौ शरशल्याचितौ कृतौ।
ध्वजाविव महेन्द्रस्य रज्जुमुक्तौ प्रकम्पितौ॥१७॥
सर्वांग जखमी त्यांचे बाणांनी व्याप्त होतसे।
कांपती दोन् इन्द्राच्या बन्धमुक्त ध्वजांसम॥१७॥
तौ सम्प्रचलितौ वीरौ मर्मभेदेन कर्शितौ।
निपेततुर्महेष्वासौ जगत्यां जगतीपती॥१८॥

ते महाधनुर्धर वीर मर्मभेदाने घायाळ।
होउनी कृश शरीर पडती पृथ्वीवर॥१८॥
तौ वीरशयने वीरौ शयानौ रुधिरोक्षितौ।
शरवेष्टितसर्वाङ्गावातो परमपीडितौ॥१९॥
वीरशय्येवरी वीर सर्वाङ्गी रक्तरंजित ।
बद्ध बाणरूपी सर्पे त्यामुळे अति पीडित॥१९॥
नह्यविद्धं तयोर्गात्रे बभूवाङ्गलमन्तरम्।
नानिर्विण्णं न चाध्वस्तमाकराग्रादजिह्मगै:॥२०॥

नसे अंगुष्ठ मात्रही जागा त्यांच्या अंगावरी।
भेदिली न जी बाणांनी हातही विदीर्ण तसे॥२०॥
तौ तु क्रूरेण निहतौ रक्षसा कामरूपिणा।
असृज सुस्रुवतुस्तीवं जलं प्रस्रवणाविव॥२१॥
पाणी जसे झऱ्यातुन् तैसे त्यांच्या अंगातुनि।
गळे रक्ताधारा क्रूर राक्षसे घायाळ करता॥२१॥
पपात प्रथमं रामो विद्धो मर्मसु मार्गणै:।
क्रोधादिन्द्रजिता येन पुरा शक्रो विनिर्जित:॥२२॥

इन्द्रा परास्त करणाऱ्या इन्द्रजित बाणामुळे।
मर्मस्थले विद्ध राम प्रथम धराशायी होतसे॥२२॥
रुक्मपुकै: प्रसन्नात्रे रजोगतिभिराशुगै:।
नाराचैरर्धनाराचैर्भल्लैरञ्जलिकैरपि।
विव्याध वत्सदन्तैश्च सिंहदंष्ट्रै: क्षुरैस्तथा॥२३॥
इन्द्रजिताने नाराच सुवर्णपंखी ज्यांचे ।
स्वच्छ अग्रभाग आणि गतिशील धुळीसम।
अञ्जलिक वत्सदन्त सिंहदंष्ट्र अर्ध क्षुर।

ऐशा बाणांनी केले घायाळ दोघांना त्या॥२३॥

स वीरशयने शिश्येऽविज्यमाविध्य कार्मुकम्।
भिन्नमुष्टिपरीणाहं त्रिनतं रुक्मभूषितम्॥२४॥

श्रीराम वीरशय्येवरी सुप्त धनुष्य त्यागुनी ।
प्रत्यंचा चढुनी ज्याची मुष्टिबन्धन सैलसे।
पार्श्वभाग दोन्ही झुकलेला मध्यभागही॥२४॥

बाणपातान्तरे रामं पतितं पुरुषर्षभम्।
स तत्र लक्ष्मणो दृष्ट्वा निराशो जीवितेऽभवत्॥२५॥

सोडलेल्या बाणासम दूर पतित श्रीरामा।
पाहुनी लक्ष्मण होई निराश जीवनाप्रति॥२५॥
रामं कमलपत्राक्षं तं दृष्ट्वा संतापं परमं गता:।
शोकार्ताश्चुक्रुशुर्घोरमश्रुपूरितलोचना:॥२६॥
कमलनयन श्रीरामा संतप्त परम जाहल्या।
पाहुनी लक्ष्मण दु:खी अश्रुपूर्ण लोचन ॥२६॥
हरयश्चापि तं दृष्ट्वा संतापं परमं गता:।
शोकार्ताश्चक्रुशुर्घोरमश्रुपूरितलोचना:॥२७॥

अवस्था पाहुनि त्याची संतप्त सर्व् वानरे।
अश्रूभरल्या नेत्रांनी आर्तनाद करु लागले॥२७॥

बद्धौ तु तौ वीरशये शयानौ ते वानरा: सम्परिवार्य तस्थु:।
समागता वायुसुतप्रमुख्या विष्दमार्ता: परमं च जग्मु:॥२८॥

नागपाशे बद्ध वीरशय्येवरी सुप्त बन्धूच्या भोवती उभे।
सर्व वानरांत हनुमानादि मुख्य वानर विषादार्त ते॥२८॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चचत्वारिंश: सर्ग:॥४५॥

युद्धकाण्ड सर्ग ४६

ततो द्यां पृथिवीं चैव वीक्षमाणा वनौकस:।
ददृशु: संततौ बाणैर्धातरौ रामलक्ष्मणौ॥१॥
दश वानर शोधून पृथ्वी नभ परतता।
पाहती विद्ध बाणांनी बन्धु श्रीराम लक्ष्मणा॥१॥
वृष्ट्वेवोपरते देवे कृतकर्माणि राक्षसे।
आजगामाथ तं देशं ससुग्रीवो बिभीषण:॥२॥

जसा वर्षा करुनी इन्द्र शान्त तसा राक्षस।
थाम्बवे बाणवर्षाव तेव्हां सुग्रीव सहित ।
बिभीषण सुद्धा येती स्थानावर त्या स्थळी॥२॥
नीलश्च द्विविदो मैन्दः सुषेणः कुमुदोऽङ्गदः।
तूर्णं हनुमता सार्धमन्वशोचन्त राघवौ॥३॥
सुषेण द्विविद मैन्द नील कुमुद अङ्गद।
श्रीरामास्तव करती शोक हनुमानासवे॥३॥
अचेष्टौ मन्दनिःश्वासौ शोणितेन परिप्लुतौ।
शरजालाचितो स्तब्धौ शयानौ शरतल्पगौ॥४॥

शरशय्येवरी दोघे सर्वांगी रक्तलांछित।
होउनी निश्चल मन्द श्वास घेत धरेवर॥४॥
नि:श्वसन्तौ यथा सौ निश्चेष्टौ मन्दविक्रमौ।
रुधिरस्रावदिग्धाङ्गौ तपनीयाविवध्वजौ॥५॥
नि:श्वसती सर्पासम निश्चेष्ट मन्द पराक्रम।
जणु तुटुनि पडलेल्या दिसती सुवर्णध्वजासम॥५॥
तौ वीरशयने वीरौ शयानौ मन्दवेष्टितौ।
यूथपै:: स्वै: परिवृतौ बाष्पव्याकुललोचनै:॥६॥

वीरशय्येवरी वीर सुप्त करती मन्दश्वसन।
घेरती त्या अश्रुपूर्ण नेत्रे सर्व यूथपतीं ॥६॥
राघवौ पतितौ दृष्ट्वा शरजालसमन्वितौ।
बभूवुर्व्यथिता: सर्वे वानरा: सबिभीषणा:॥७॥
पृथ्वीवर शरजाल आवृत उभय राघव।
पाहुनी सबिभीषण व्यथित सर्व वानर॥७॥।
अन्तरिक्ष निरीक्षन्तो दिश: सर्वाश्च वानरा:।
न चैनं मायया छन्नं ददृशू रावणिं रणे॥८॥

दिशा सर्व नि आकाश न्याहाळती वारंवार।
परि मायेने गुप्त न दिसे इन्द्रजित कुठे ॥८॥
तं तु मायाप्रतिच्छन्नं माययैव बिभीषण:।
वीक्षमाणो ददर्शाग्रे भ्रातु: पुत्रमवस्थितम्।
तमप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे॥९॥
तेव्हां बिभीषण मायेने पाहण्या आरंभ करी।
मायेने गुप्त तदा पाही पुतण्यास उभा पुढे।
सामना त्याचा करणारा योद्धा कोणि तिथे नसे ॥९॥

ददर्शान्तर्हितं वीरं वरदानाद् बिभीषण:।
तेजसा यशसा चैव विक्रमेण च संयुत:॥१०॥
तेज यश पराक्रम युक्त बिभीषण मायाद्वारा।
पाहतसे वरदाने गुप्त वीर इन्द्रजिता ॥१०॥
इन्द्रजित् त्वात्मन: कर्म तौ शयानौ समीक्ष्य च।
उवाच परमप्रीतौ हर्षयन् सर्व राक्षसान्॥११॥
युद्धभूमिवरी सुप्त पाहुनी रामलक्ष्मणा।
प्रसन्न इन्द्रजित हर्षे वदे सर्व राक्षसां॥११॥

दूषणस्य च हन्तारो खरस्य च महाबलौ।
सादितौ मामकैर्बाणैर्धातरौ रामलक्ष्मणौ॥१२॥
पहा हे खरदूषणांचा वध करणारे बन्धु ।
रामलक्ष्मण बाणाने माझ्या मारले जाति जे॥१२॥
नेमौ मोक्षयितुं शक्यावेतस्मादिषुबन्धनात्।
सर्वैरपि समागम्य सर्षिसङ्क्: सुरासुरै:॥१३॥
सोडविणे न तया शक्य या बाणबन्धनातुनी।
येती जरी मुनिंसह देवता आणि असुरही॥१३॥

यत्कृते चिन्तयानस्य शोकार्तस्य पितुर्मम।
अस्पृष्ट्वा शयनं गात्रैस्त्रियामा याति शर्वरी॥१४॥
कृत्स्नेयं यत्कृते लङ्का नदी वर्षास्विवाकुला।
सोऽयं मूलहरोऽनर्थ सर्वेषां शमितो मया॥१५॥

ज्यांच्या चिन्तेमुळे शोकार्त पित्यास मम।
शय्येस स्पर्श न करता रात्र घालवु लागते॥१४॥
आणि नदीसम वर्षा ऋतूतिल व्याकुळ तो असे।
लंका अनर्थाचे मूळ शान्त आज केले असे॥१५॥

रामस्य लक्ष्मणस्यैव सर्वेषां च वनौकसाम्।
विक्रमा: निष्फला: सर्वे यथा शरदि तोयदा:॥१६॥

राम लक्ष्मण वानर यांचे व्यर्थ विक्रम।
मेघापरी जलरहित शरद ऋतूतिल ॥१६॥

एवमुक्त्वा तु तान् सर्वान् राक्षसान् परिपश्यत्:।
यूथपानपि तान् सर्वांस्ताडयत् स च रावणि:॥१७॥

ऐसे बोलुनि पाहून राक्षसांकडे इन्द्रजित्।
वानरयूथपतींना सर्व आरंभतसे मारण्या॥१७॥

नीलं नवभिराहत्य मैन्दं सद्विविदं तथा।
त्रिभिस्त्रिभिरमित्रघ्नस्तताप परमेषुभि:॥१८॥

नीलास नऊ बाणांनी करी घायाळ त्यासवे।
तीन तीन बाणांनी मैन्द आणि द्विविदासही॥१८॥

जाम्बवन्त महेष्वासो विद्ध्वा बाणेन वक्षसि।
हनूमतो वेगवतो विससर्ज शरान् दश॥१९॥

छातीस जाम्बवानाच्या बाणाने जखमी करी।
मारी तसे दहा बाण हनुमानास वेगवान्॥१९॥

गवाक्षं शरभं चैव तावप्यमितविक्रमौ।
द्वाभ्यां द्वाभ्यां महावेगो विव्याध युधि रावणिः॥२०॥

गवाक्षा शरभा दोघां तेही अतिपराक्रमी।
करी घायाळ प्रत्येकी दोन मारुनिया शर॥२०॥

गोलाङ्गलेश्वरं चैव वालिपुत्रमथाङ्गदम्।
विव्याध बहुभिर्बाणैस्त्वरमाणोऽथ रावणिः॥२१॥

गोलांगलेश्वरा तैसे वालिपुत्रा अंगदा।
अनेक मारुनि तीर करी जखमि रावणि॥२१॥

तान् वानरवरान् भित्त्वा शरैरग्निशिखोपमै:।
ननाद बलवांस्तत्र महासत्त्व: स रावणि:॥२२॥
प्रमुख वानरां ऐसे घायाळ तीक्ष्ण बाणांनी।
बलवान रावणपुत्र जोराने गर्जना करी॥२२॥
तानर्दयित्वा बाणौघैस्त्रसयित्वा च वानरान्।
प्रजहास महाबाहुर्वचनं चैदमब्रवीत्॥२३॥
वानरा पीडित ऐसे भयभीत करूनिया।
इन्द्रजित महाबाहु अट्टहास करुनी बोलला॥२३॥

शरबन्धेन घोरेण मया बद्धौ चमूमुखे।
सहितौ भ्रातरावेती निशामयत राक्षसा:॥२४॥
युद्धारम्भीच बन्धूंना बाणपाशात भयंकर।
बान्धले मी एकत्र राक्षसांनो पहा जरा॥२४॥
एवमुक्तास्तु ते सर्वे राक्षसा: कूटयोधिन:।
परं विस्मयमापन्ना: कर्मणा तेन हर्षिता:॥२५॥
बोल ऐकुनिया त्याचे कूटयोद्धे ते राक्षस।
चकित होउनि त्याच्या कर्माने अतिहर्षित॥२५॥

विनेदुश्च महानादान् सर्वे ते जलदोपमा:।
हतो राम इति ज्ञात्वा रावणिं समपूजयन्॥२६॥
सर्व राक्षस करती सिंहनाद मेघासम।
समजुनी मृत राम इन्द्रजिता अभिनन्दती॥२६॥
निष्पन्दौ तु तदा दृष्ट्वा भ्रातरौ रामलक्ष्मणौ।
वसुधायां निरुच्छवासौ हतावित्यन्वमन्यत॥२७॥
श्रीरामलक्ष्मण निश्चेष्ट श्वासहीन हे पाहुनी।
झालेच मृत ते दोघे इन्दजित् समजे असे॥२७॥

हर्षेण तु समाविष्ट इन्दजित् समिञ्जय:।
प्रविवेश पुरीं लङ्कां हर्षयन् सर्वनैऋतान्॥२८॥
इन्दजित युद्धविजयी प्रवेश करि लंकेत।
होउनी हर्षित सर्व राक्षसहि त्याच्या सवे॥२८॥
रामलक्ष्मणयोर्दृष्ट्वा शरीरे सायकैश्चिते।
सर्वाणि चाङ्गोपाङ्गानि सुग्रीवं भयमाविशत्॥२९॥
पाहुनी रामलक्ष्मणा शरीरावरि सर्वत्र ।
बाणांनी व्याप्त सुग्रीव अत्यंत भयकंपित ॥२९॥

तमुवाच परित्रस्तं वानरेन्द्र बिभीषण:।
सबाष्पवदनं दीनं शोकव्याकुललोचनम्॥३०॥
अलं त्रासेन सुग्रीव बाष्पवेगो निगृह्यताम्।
अश्रुभरित नेत्रांनी दीन तो शोकव्याकुळ।
भयभीत वानरेन्द्रा बिभीषण बोलला असे॥३०॥
न त्रास करुनी घेई थाम्बवी अश्रु आपले।
एवंप्रायाणि युद्धानि विजयो नास्ति नैष्ठिक:॥३१॥
सभाग्यशेषतास्माकं यदि वीर भविष्यति।

मोहमेतो प्रहास्येते महात्मानौ महाबलौ॥३२॥
पर्यवस्थापयात्मानमनाथं मां च वानर।
सत्यधर्माभिरक्तानां नास्ति मृत्युकृतं भयम्॥३३॥

युद्धातील स्थितीत या विजय नसे निश्चित॥३१॥
जर भाग्य असे शेष आपले हे महाबली।
महात्मे तर हे दोघे होतील सावध निश्चित॥३२॥
सांभाळा तुम्ही स्वत:स आणि अनाथा मज ।
सत्यधर्मे विश्वसती तया नसे मृत्युभय ॥३३॥

एवमुक्त्वा ततस्तस्य जलक्लिन्नेनपाणिना।
सुग्रीवस्य शुभे नेत्रे प्रममार्ज बिभीषण:॥३४॥
बिभीषण बोलुन ऐसे ओले झालेल्या जले।
हातांनी सुन्दर नेत्र सुग्रीवाचे ते पुसतसे॥३४॥
तत: सलिलमादाय विद्यया परिजप्य च।
सुग्रीवनेत्रे धर्मात्मा प्रममार्ज बिभीषण:॥३५॥
त्यानन्तर जल हाती घेउनी करुनी जप।
धर्मात्मा लावी नेत्रास सुग्रीवाच्या बिभीषण ॥३५॥

विमृज्य वदनं तस्य कपिराजस्य धीमत:।
अब्रवीत् कालसम्प्राप्तमसंभ्रान्तमिदं वच:॥३६॥

बुद्धिमान् कपिराजाचे मुख ओले पुसूनिया ।
समयोचित वच बोले कोणत्याही भीतीविना॥३६॥

न काल: कपिराजेन्द्र वैक्लव्यमविलम्बितुम्।
अतिस्नेहोऽपि कालेऽस्मिन् मरणायोपकल्पते॥३७॥

वानरराज हा काल घाबरण्याचा नसे।
अतिस्नेहही करतो मृत्युभय उपस्थित॥३७॥

तस्मादुत्सृज्य वैक्लव्यम् सर्वकार्यविनाशिनम्।
हितं रामपुरोगाणां सैन्यानामनिचिन्तय॥३८॥
तरी विकलता सोडी सर्वकार्यविनाशक।
करी विचार हिताचा सैन्याच्या स्वामि राम ज्या॥३८॥
अथ वा रक्ष्यतां रामो यावत्संज्ञाविपर्यय:।
लब्धसंज्ञो हि काकुत्स्थौ भयं नौ व्यपनेष्यत:॥३९॥
शुद्धीवर न जोवरी राम तोवरी रक्षिले पाहिजे।
शुद्ध येता दोघे दूर करतील सर्वांचे भय॥३९॥

नैतत् किंचन रामस्य न च रामो मुमूर्षति।
नह्येनं हास्यते लक्ष्मीर्दुर्लभा या गतायुषाम्॥४०॥
न भय या संकटाचे श्रीराम शकती न मरू।
आयुष्य ज्यांचे संपे त्यांची दुर्लभ लक्ष्मी।
करू न शकते त्याग जी दिसे त्यांच्यावरी॥४०॥
तस्मादाश्वासयात्मानं बलं चाश्वासय स्वकम्।
यावत् सैन्यानि सर्वाणि पुनः संस्थापयाम्यहम् ॥४१॥
तरी धीर धरूनी सैन्या आश्वासित करी पुन्हा।
करितो मी स्थिर सैन्या पुन्हा धीर देउनिया॥४१॥

एते हि फुल्लनयनास्त्रासादागतसाध्वसा:।
कर्णे कर्णे प्रकथिता हरयो हरिसत्तम॥४२॥

पहा कपिश्रेष्ठ डोळ्यात वानरांच्या भय दिसे।
आणि ते एकमेकांच्या कानात कुजबुजती ॥४२॥

मां तु दृष्ट्वा प्रधावन्तमनीकं सम्प्रहर्षितम्।
त्यजन्तु हरयस्त्रासं भुक्तपूर्वामिव स्रजम्॥४३॥

धावता मज पाहुनि धैर्य युक्त प्रसन्न ती।
होतसे वानरसेना भयमुक्त पूर्वी जशी॥४३॥

समाश्वास तु सुग्रीवं राक्षसेन्द्रो बिभीषण:।
विद्रुतं वानरानीकं तत् समाश्वासयत् पुन:॥४४॥
सुग्रीवा आश्वासुनि ऐसे राक्षसराज बिभीषण।
देई धीर कपिसैन्या पळण्यास प्रवृत्त जे ॥४४॥
इन्दजित तु महामाय: सर्वसैन्यसमावृत:।
विवेश नगरीं लंकां पितरं चाभ्युपागमत्॥४५॥
इन्द्रजित महामायावी सर्व सैन्या घेउनी।
येउनी परत लंकेत पित्यास भेटे आपुल्या॥४५॥

तत्र रावणमासाद्य् अभिवाद्य कृताञ्जलि:।
आचचक्षे प्रियं पित्रे नहतौ रामलक्ष्मणौ॥४६॥
रावणाजवळी जात प्रणाम त्यास करूनिया।
मारले रामलक्ष्मणा वार्ता ही प्रिय त्या वदे॥४६॥
उत्पपात ततो हृष्ट: पुत्रं च परिषस्वजे।
रावणो रक्षसां मध्ये श्रुत्वा शत्रू निपातितौ॥४७॥
ऐकुनी शत्रु मृत वार्ता हर्षे उडि मारोनिया ।
उठोनि रावण पुत्रा मिठीत आपल्या घेतसे॥४७॥

उपाघ्राय च तं मूर्ध्नि पप्रच्छ प्रीतमानसः।
पृच्छते च यथावृत्तं पित्रे तस्मै न्यवेदयत्॥४८॥
यथा तौ शरबन्धेन निश्चेष्टो निष्प्रभौ कृतौ॥४९॥

चुंबुनी मस्तका त्याच्या विचारी त्यास आनन्दे।
वृत्त सांगे यथासांग इन्द्रजित कसे बान्धुनी॥४८॥
बाणबन्धनी निश्चेष्ट केले श्रीराम लक्ष्मणा॥४९॥

स हर्षवेगानुगतान्तरात्मा श्रुत्वा गिरं तस्य महारथस्य्।
जहौ ज्वरं दाशरथेः समुत्थं प्रहृष्टवाचाभिननन्द पुत्रम्॥५०॥

ऐकूनि हे रावण अन्तरात्मा सन्तुष्ट होऊनी अभिनन्दन।
त्याचे करी त्यागुनी भय चिन्ता जी श्रीरामचन्द्रामुळे मनी॥५०॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्चत्वारिंश: सर्ग:॥४६॥

युद्धकाण्ड सर्ग ४७

तस्मिन् प्रविष्टे लङ्कायां कृतार्थे रावणात्मजे।
राघवं परिवार्याश्च ररक्षुर्वानरर्षभाः॥१॥
प्रवेशे लंकेत कृतार्थ इन्द्रजित् रावणात्मज।
रक्षति एकत्र जमुनी श्रीरामा सर्व वानर॥१॥
हनुमानङ्गदो नीलः सुषेणः कुमुदो नलः।
गजो गवाक्षो गवयः शरभो गंधमादनः॥२॥

जाम्बवानृषभ: स्कन्धो रम्भ: शतबलि: पृथु:।
व्यूढानीकाश्च यत्ताश्च द्रुमानादाय सर्वत:॥३॥

हनुमान् अङ्गद नील सुषेण कुमुद नल।
गवय गज गवाक्ष शरभ गन्धमादन॥२॥

जाम्बवान् ऋषभ: स्कन्ध रम्भ शतबलि।
पृथु वानर सर्व वृक्षासह हाती रक्षती॥३॥

वीक्षमाणा दिश: सर्वास्तिर्यगूर्ध्वं च वानरा:।
तृणेश्वपि च चेष्टत्सु राक्षसा इति मेनिरे॥४॥

वरखाली सर्व दिशांना लक्ष देती वानर।
हालता तृणही आले राक्षस ऐसे समजती॥४॥
रावणश्चापि संहृष्टो विसृज्येन्द्रजितं सुतम्।
आजुहाव तत: सीतारक्षणी राक्षसीस्तदा॥५॥
इन्द्रजिता निरोप देत हर्षोत्फुल्ल रावण।
बोलवी सीतारक्षक राक्षसींना स्वत:कडे॥५॥
राक्षस्यत्रिजटा चापि शासनात् तमुपस्थिता:।
ता उवाच ततो हृष्टो राक्षसी राक्षसाधिप:॥६॥

निरोप मिळता त्रिजटा येत सर्व राक्षसींसवे।
हर्षोत्फुल्ल राक्षसराज त्या सर्वांना असे म्हणे॥६॥
हताविन्द्रजिताख्यात वैदेह्या रामलक्ष्मणौ।
पुष्पकं तत्समारोप्य दर्शयध्वं रणे हतौ॥७॥
सांगा सीतेस इन्द्रजिताने मारले रामलक्ष्मणा।
पुष्पक विमानातून दाखवा तिज बन्धुना॥७॥
यदाश्रयादवष्टब्धा नेयं मामुपतिष्ठते।
सोऽस्या भर्ता सह भ्राता निहतो रणमूर्धनि॥८॥

गर्वाने आश्रये ज्याच्या येत नव्हती मजकडे।
मारला जाई बन्धूसह युद्धात पति तो तिचा ॥८॥
निर्विशंका निरुद्विग्ना निरपेक्षा च मैथिली।
मामुपस्थास्यते सीता सर्वाभरण भूषिता॥९॥
नसता आता अपेक्षा भेटण्याची बन्धुद्वया।
भय शंकारहित ती आभूषणविभूषित।
होईल सेवेत माझ्या उपस्थित ती इथे॥९॥
अद्य कालवशं प्राप्तं रणे रामं सलक्ष्मणम्।
अवेक्ष्य विनिवृत्ता सा चान्यां गतिमपश्यती॥१०॥

अनपेक्षा विशालाक्षी मामुपस्थास्यते स्वयम्।
आता कालवश राम लक्ष्मणासह पाहता।
निवृत्त त्याचेवरुनी मन तिज अन्य न गति॥१०॥
त्यामुळे विशालाक्षी येईल स्वत: मजकडे।
तस्य तद् वचनं श्रुत्वा रावणस्य दुरात्मन:॥११॥
राक्षस्यस्तास्तथेत्युक्त्वा जग्मुर्वै यत्र पुष्पकम्।
दुरात्मा रावणाचे हे ऐकुनिया वच राक्षसी॥११॥
ठीक आहे म्हणुनी जाती पुष्पक विमान जिथे।

ततः पुष्पकमादाय् राक्षस्यो रावणाज्ञया॥१२॥
अशोकवनिकास्थां तां मैथिलीं समुपानयन्।
रावणाज्ञेने राक्षसी त्या पुष्पक विमानासवे॥१२॥
अशोकवनि बसलेल्या जाती मैथिलीकडे।
तामादाय तु राक्षस्यो भर्तृशोकपराजिताम्॥१३॥
सीतामारोपयामासुर्विमानं पुष्पकं तदा ।
सीतेस आणुनि तात्काल पतिशोके व्याकुल जी॥१३॥
चढवती राक्षशिणी पुष्पक विमानात त्या ।

ततः पुष्पकमारोप्य सीतां त्रिजटया सह॥१४॥
जग्मुर्दर्शयितुं तस्यै राक्षस्यो रामलक्ष्मणौ।
रावणाश्चारयामास पताकाध्वजमालिनीम्॥१५॥

बसवुनी पुष्पकयानी सीतेस त्रिजटेसह।
राक्षशिणी तिला नेती दावाया रामलक्ष्मण।
रावण फिरवी त्यांना अलंकृत लंकेवरी॥१५॥

प्राघोषयत् हृष्टश्च लङ्कायां राक्षसेश्वरः।
राघवो लक्ष्मणश्चैव हताविन्द्रजिता रणे॥१६॥

घोषणा करी लंकेत हर्षाने राक्षसेश्वर ।
मारले रामलक्ष्मणांना इन्द्रजिताने रणी॥१६॥
विमानेन गत्वा तु सीता त्रिजटया सह।
ददर्श वानराणां तु सर्वं सैन्यं निपातितम्॥१७॥
त्रिजटेसह विमानी जाउनि सीतेने रणी।
पाहिली वानरसेना मारली गेलेली अशी॥१७॥
प्रहृष्टमनसश्चापि ददर्श पिशिताशनान्।
वानरांश्चातिदु:खार्तान् रामलक्ष्मणपार्श्वत:॥१८॥

राक्षसां प्रसन्न पाही वानरां सर्व दु:खित।
उभे श्रीराम लक्ष्मणा जवळी असति जे॥१८॥
तत: सीता ददर्शोभौ शयानौ शरतल्पगौ।
लक्ष्मणं चैव रामं च विसंज्ञो शरपीडितौ॥१९॥
सीताहि नन्तर पाही श्रीराम आणि लक्ष्मणा।
शरपीडित पडलेल्या संज्ञाशून्य होउनी॥१९॥
विध्वस्तकवचौ वीरौ विप्रविद्धशरासनौ।
सायकैश्छिन्नसर्वाङ्गौ शरस्तम्बमयौ क्षितौ॥२०॥

त्यांचे कवच तुटलेले धनुर्बाण विलगलेले।
बाणांनी सर्वाङ्ग छिन्न ऐसे पडलेले भूवरी।
दिसती पुतळ्यासम बाणसमुहे निर्मित॥२०॥
तौ दृष्ट्वा भ्रातरौ तत्र प्रवीरौ पुरुषर्षभौ।
शयानौ पुण्डरीकाक्षौ कुमाराविव पावकी॥२१॥
शरतल्पगतौ वीरौ तथाभूतौ नरर्षभौ।
दु:खार्ता करुणं सीता सुभृशं विललाप ह॥२२॥
पाहुनी बन्धुना वीर प्रमुख जे पुरुषोत्तम।

अग्निपुत्र शाख विशाखासम शरसमूहे निद्रित ।
पाहुनी अवस्था त्यांची सीता जी दु:खपीडित।
विलाप करुणायुक्त स्वरे जोराने करु लागली॥२२॥
भर्तारमनवद्याङ्गी लक्ष्मणं चासितेक्षणा।
प्रेक्ष्य पांसुषु चेष्टन्तौ रुरोद जनकात्मजा॥२३॥
पति श्रीराम पडलेले धुळीत लक्ष्मणासह।
पाहुनी जनकात्मजा धाय मोकलुनि रडे॥२३॥
सबाष्पशोकाभिहता समीक्ष्य तौ भ्रातरौ देवसुतप्रभावौ।
वितर्कयन्ती निधनं तयो: सा दु:खान्विता वाक्यमिदं जगाद॥२४॥

अश्रुपूर्ण नेत्रे पाहुनि बन्धूंना देवतातुल्य प्रभावशाली तदा।
मृत ते आशंकेने बुडुनी दु:ख चिन्तेत बोलली ती अशी॥२४॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तचत्वारिंश: सर्ग:॥४७॥

युद्धकाण्ड सर्ग ४८

भर्तारं निहतं दृष्ट्वा लक्ष्मणं च महाबलम्।
विललाप भृशं सीता करुणं शोककर्शिता॥१॥
महावीर पतीस तैसे लक्ष्मणा मृत पाहुनी।
करुणायुक्त विलाप शोकपीडित सीता करी ॥१॥
उचुर्लाक्षणिका येमां पुत्रिण्यविधवेति च।
तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः॥२॥

असत्यवादी ते ज्ञानी जे सधवा पुत्रवती।
मज म्हणती ऐसे झाल्याने श्रीराम मृत॥२॥
यज्वनो महिषीं ये मामूचु: पत्नी च सत्रिण:।
तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिन:॥३॥
मज यज्ञपरायण सत्र संचालिनी पत्नी।
राजाची वदती ऐसे ज्ञानी आज असत्य ते॥३॥
वीरपार्थिवपत्नीनां ये विदुर्भर्तृपूजिताम्।
तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिन:॥४॥

पूजनीय राण्यांमध्ये पतिद्वारे सन्मानित।
मज मानणारे ज्ञानी असत्य ठरती आज ते॥४॥
ऊचु: संश्रवणे येमां द्विजा: कार्तान्तिका: शुभाम्।
तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिन:॥५॥
भविष्यज्ञ ब्राह्मण जे नित्य मंगलमयी मज।
म्हणती ठरले आज असत्यवादी रामे मृत॥५॥
इमानि खलु पद्मानि पादयोर्वै कुलस्त्रिय:।
आधिराज्यऽ भिषिच्यन्ते नरेन्द्रै: पतिभि: सह॥६॥

पद्मचिह्न पायावरि ज्यांच्या कुलवती स्त्रिया।
त्या होति सम्राज्ञी जे असे मम दोन्ही पदावरि॥६॥
वैधव्यं यान्ति येर्नार्योऽलक्षणैर्भाग्यदुर्लभा:।
नाम्नस्तानि पश्यामि पश्यन्ती हतलक्षणा॥७॥
वैधव्य येत नारींना ज्या लक्षणे त्यांची जशी।
दिसती न कोणतीही पहाता मम अंगावरी ।
शुभ लक्षणे दिसती सर्व परि होती निष्फल॥७॥
सत्यनामानि पद्मानि स्त्रीमुक्तानि लक्षणै:।

तान्यद्य निहते रामे वितथानि भवन्ति मे॥८॥

हस्तपादावरी स्त्रीच्या कमलचिह्ने अमोघ जी।

माझी ती आज निष्फल होती राममृत्यूमुळे॥८॥

केशा: सूक्ष्मा: समा नीला भ्रवो चासंहते मम।

वृत्ते चारोमके जग्ङ्घे दन्ताश्चाविरला मम॥९॥

केश सुन्दर मम कृष्ण जोडल्या नसती भिवया।

पिंढऱ्या गोल रोमरहित दांतही विरळ नसती॥९॥

शले नेत्रे करौ पादौ गुल्फावूरू समौ चितौ।
अनुवृत्तनखा: स्निग्धा: समश्चाग्ङ्गुलयो मम॥१०॥
सर्व अवयव माझे असती पुष्ट मांसल।
बोटे दोन्ही हातांची सुन्दर तशीच नखे॥१०॥
स्तनौ चाविरलौ पीनौ मामको मग्नचूचुकौ।
मग्ना चोत्सेधनी नाभि: पावोरस्कं च मे चितम्॥११॥
स्तन स्थूल चिकटलेले स्तनाग्रे अन्तर्मुख।
खोल नाभि पार्श्वभाग मांसल ते वक्षस्थळ॥११॥

मम वर्णो मणि निभो मृदून्यङ्गरुहाणि च।
प्रतिष्ठितां द्वादशभिर्मामूचु: शुभलक्षणाम्॥१२॥
मण्यासम अंगकान्ति शरीरकान्ति कोमल।
पायाची दहा बोटे तळवे दोन्ही भूमिस्पर्शी।
शुभलक्षणा त्यामुळे वदती लक्षणज्ञ मज॥१२॥
समग्रयवमच्छिद्रं पाणिपादं च वर्णवत्।
मन्दस्मितेत्येव च मां कन्यालाक्षणिका विदु:॥१३॥
पदहस्त वर्ण लाल अच्छिद्र हस्तांगुले।

मन्दस्मित असे माझे सर्व ही शुभलक्षणे॥१३॥
आधिराज्येऽभिषेको मे ब्राह्मणैः पतिना सह।
कृतान्तकुशलैरुक्तं तत् सर्वं वितथीकृतम्॥१४॥
पतीस राज्याभिषेक ब्राह्मणे वदले मम।
ज्योतिषतज्ञांनी परि आज सर्व असत्य ते॥१४॥
शोधयित्वा जनस्थानं प्रवृत्तिमुपलभ्य च।
तीर्त्वा सागरमक्षोभ्यं भ्रातरय् गोष्पदे हतौ॥१५॥
मिळता मम समाचार जनस्थानास शोधुनी।

सागर तरुनी येती हरविण्यास राक्षसा।
गोपद लांघण्यासम जे परि तेचि आज मृत॥१५॥
ननु वारुणमाग्नेजायमैन्द्रं वायव्यमेव च।
अस्त्रं ब्रह्मशिरश्चेनं राघवो प्रत्यपद्यत॥१६॥
जाणती आग्नेय ऐन्द्र वायव्य नि महाशिर।
अस्त्रे का नसे केला प्रयोग युद्धामध्ये॥१६॥
अदृश्यमानेन रणे मायया वासवोपमौ।
मम नाथावनाथाया निहतौ रामलक्ष्मणौ॥१७॥

रक्षक मम अनाथाचे इन्द्रतुल्य पराक्रमी।
परि राहुनि अदृश्य इन्द्रजित् मारी तयां॥१७॥
नहि दृष्टिपथं प्राप्य राघवस्य रणे रिपुः।
जीवन् प्रतिनिवर्तेत यद्यपि स्यान्मनोजवः॥१८॥
अन्यथा रघुनाथाच्या येता शत्रु दृष्टिपथी।
जरि मनोवेगशाली न जीवित राहू शके॥१८॥
न कालस्यातिभारोऽस्ति कृतान्तश्च सुदुर्जयः।
यत्र रामः सह भ्रात्रा शेते युधि निपातितः॥१९॥

परि अशक्य न काळास कृतान्त त्या वश होउनी।
श्रीराम बन्धुसवे आज मृत युद्धभूमीवरी॥१९॥
न शोचामि तथा रामलक्ष्मणं च महारथम्।
चात्मानं जननीं चापि यथा श्वश्रू तपस्विनीम्॥२०॥
सा तु चिन्तयते नित्यं समाप्तव्रतमागतम्।
कदा द्रक्ष्यामि सीतां च लक्ष्मणं च सराघवम्॥२१॥
श्रीराम लक्ष्मण किंवा मम मातेस्तव नच ।
करते जेवढा शोक तपस्विनि सासूस्तव॥२०॥

सदा चिन्तित जी पूर्ण वनवास करुनीया।
आलेल्या कधि पाहीन श्रीराम सीता लक्ष्मणा॥२१॥
परिदेयमानां तां राक्षसी त्रिजटाब्रवीत्।
मा विषादं कृथा देवि भर्तायं तव जीवति॥२२॥
विलाप करिता ऐश्या सीतेस त्रिजटा वदे।
विषाद न करी देवी पतिदेव तव् जीवित॥२२॥
कारणानि च वक्ष्यामि महान्ति सदृशानिच।
यथेमौ जीवतो देवि भ्रातरौ रामलक्ष्मणौ॥२३॥

उचित कारणे देवी तुला सांगते महान्
जीवित श्रीराम लक्ष्मण करती जी सूचित ॥२३॥
नहि कोपपरीतानि हर्षपर्युत्सुकानि च।
भवन्ति युधि योधानां मुखानि निहते पतौ॥२४॥
मृत योध्यांच्या नसते मुखावर हर्ष खेद वा।
असे मुखावर यांच्या म्हणुनी ते जीवित॥२४॥
इदं विमानं वैदेहि पुष्पकं नाम नामत:।
दिव्यं त्वां धारयेनं वेदं यद्योतौ गतजीवितौ॥२५॥

पुष्पक विमान दिव्य असे त्यामुळे तुजला।
नच करते धारण जर हे जीवित नसते ॥२५॥

हतवीरप्रधाना हि गतोत्साहा निरुद्यमा।
सेनाभ्रमति संख्येष हतकर्णेव नौर्जलै॥२६॥

इयं पुनरसम्भ्रान्ता निरुद्विग्ना तपस्विनि।
सेना रक्षति काकुत्स्थौ मया प्रीत्या निवेदितौ॥२७॥

मरता प्रमुख वीर गतोत्साह सेना फिरे।
रणी दिशाहीन जशी नौका कर्णधाराविना ॥२६॥

सेना येथ न उद्विग्न सम्भ्रमी वा तपस्विनी।
रक्षितसे उभयां यावरुनी प्रेमे हे तुज सांगते॥२७॥
सा त्वं भव सुविस्रब्धा अनुमानै:सुखोदयै:।
अहतौ पश्य काकुत्स्थौ स्नेहादेतद् ब्रवीमि ते॥२८॥
अनुमाने सुखाच्या या निश्चिन्त करि विश्वास।
न मृत हे दोघे स्नेहपूर्वक सांगते मी तुज ॥२८॥
अनृतं नोक्तपूर्वं मे न च वक्ष्यामि मैथिलि।
चारित्रसुखशीलत्वात् प्रविष्टासि मनो मम॥२९॥

निर्मल चारित्र्ये तव मनी माझ्या प्रवेशसी।
त्यामुळे पूर्वी असत्य बोलले नच आजही ॥२९॥
नेमो शक्यो रणे जेतुं सेन्द्रैरपि सुरासुरै:।
तादृशं दर्शनं दृष्ट्वा मया चोदीरितं तव॥३०॥
न दोघां जिंकू शकतो सुरासुरांसह इन्द्रही।
लक्षणावरुनी या मी ऐसे सांगतसे तुला॥३०॥
इदं ति सुमहच्चित्रं शरै: पश्यस्व मैथिलि।
विसंज्ञो पतितावेतौ नैव लक्ष्मीर्विमुञ्चति॥३१॥

देख महान् आश्चर्य जरि बाणांनी बेशुद्ध हे।
तरी लक्ष्मीसम कान्ति न जाई सोडुनी तया॥३१॥

प्रायेण गतसत्त्वानां पुरुषाणां गतायुषाम्।
दृश्यमानेषु वक्त्रेषु परं भवति वैकृतम्॥३२॥

प्राण ज्यांचे नष्ट होती त्या पुरुषांच्या मुखावरी।
विकृति दिसे परि यांच्या मुखावर शोभा दिसे॥३२॥

त्यज दु:खं च शोकं च मोहं च जनकात्मजे।
रामलक्ष्मणयोरर्थे नाद्य शक्यमजीवितुम्॥३३॥

सोड दु:ख शोक मोह श्रीरामलक्ष्मणार्थ तू।
मरू न शकती दोघे ऐक तू जनकात्मजे॥३३॥
श्रुत्वा तु वचनं तस्या: सीता सुरसुतोपमा।
कृताञ्जलिरुवाचेमामेवमस्त्विति मैथिली॥३४॥
तिचे हे ऐकुनि बोल देवकन्येसम जानकी।
ऐसेच व्हावे भगिनी हात जोडुनि तिला वदे॥३४॥
विमानं पुष्पकं तत्तु संनिवत्यं मनोजवम्।
दीना त्रिजटया सीता लङ्कामेव प्रवेशिता॥३५॥

तेव्हां मनोवेगे त्रिजटा विमानातुनि पुष्पक।
प्रवेश करि लंकेत दु;खी सीतेसह पुन्हा॥३५॥
ततस्त्रिजटया सार्धं पुष्पकादवरुह्य सा।
अशोकवनिकामेव राक्षसीभि: प्रवेशिता॥३६॥
नंतर त्रिजटेसह विमानातुनि उतरुनी।
अशोकवनी प्रवेश करी ती राक्षसींसवे॥३६॥
प्रविश्य सीता बहुवृक्षखण्डां तां राक्षसेन्द्रस्य विहारभूमिम्।
सम्प्रेक्ष्य संचिन्त्य च राजपुत्रौ परं विषादं समुपाजगाम॥३७॥

अनेक वृक्ष्यांनी सुशोभित राक्षसराजाच्या विहारभूमित प्रवेश।
करुनी चिन्तन उभय राजपुत्रांचे महान शोकात सीता बुडे ती॥३७॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डेऽष्टचत्वारिंश: सर्ग:॥४८॥

श्री. श्याम कुलकर्णी यांची ई साहित्यवरची इतर नऊ पुस्तकं.
यांवर टॅप किंवा क्लिक करा. थोडं थांबा. ते उघडेल. वाचा.

श्याम कुलकर्णी
तुझी माझी मोटी

हास्यरंगी रंगले
श्याम कुलकर्णी


श्याम कुलकर्णी
हमरी बारी
INSURANCE
STAMPING
VISA
IMMIGRATION

वाल्मिकीरामायण- २४

मराठी

श्याम कुलकर्णी






मराठी श्लोकानुवाद- श्री श्याम कुलकर्णी
॥ श्रीमद्भगवद्गीता ॥

लवकरच येत आहे.

श्री श्याम कुलकर्णी अनुवादित

मूळ वाल्मिकी रामायण मराठी श्लोकमय पुढील भाग

www.esahity.com

9987737237

(विनामूल्य पुस्तके मिळवण्यासाठी आपले नाव व गाव Whatsapp करा)